

॥ श्रीवसिष्ठउ० स्वयंत्वमेत्यराजानंपूनमागधवंदिनः॥ प्रबोधयितुमेवाद्यजगरुचेर्निशात्यये॥ १॥ वीणावेणुर
वोन्मिश्रकलतालततानुगं॥ समस्तेश्रुतिरुश्राव्यप्रशस्तमधुरस्वरं॥ २॥ स्निग्धकंठासुविस्पष्टमूर्छनाग्राम
संस्थितं॥ जगुर्गेयंमनोहारीतारमंद्रलयान्वितं॥ ३॥ ऊचुश्चतंमहात्मानंराजानंसुखमागधाः॥ स्वयंतंविधि
धावाचः प्रबोधयिषवःपुनः॥ ४॥ पश्यायमस्तमभ्येतिराजेंद्रेंदुःपरान्वितः॥ विवर्धमानयानूनंतवचक्रां
बुजश्रिया॥ ५॥ द्रष्टुंत्वाननांयोनंसमुत्कइवाधुना॥ तमांसिभिंदनादित्यः संप्राप्रोद्यदयोविभोः॥ ६॥
राजंनखिलशीतांशुवंद्यामोक्षिशिखामणे॥ निंद्रापाकंमहाबुध्येप्रतिबुध्यस्वसांप्रतं॥ ७॥ इतितेषांवचःश्रु
त्वन्नबुध्यतमहीपतिः॥ क्षीराब्धौशेषशयनाद्यथापंकजलोचनः॥ ८॥ विनिद्रात्तः समुत्थायकर्मनेत्यकमा
दरात्॥ चकारावहितः सम्यक्कृत्तपारिक्रमशेषतः॥ ९॥ देवतामभिवंद्यसद्विप्रस्वर्गंधभूषणः॥ कृत्वादू
र्वांजनादर्शमांगल्यालंभनानिच॥ १०॥ दत्वादानानिवार्थिभ्योनत्वागोब्राह्मणान्ऋषिः॥ निष्क्रम्यचपुरा
तस्माद्रुपतल्लेचभास्करं॥ तावत्समाययुःसर्वेमंत्रिसामंतनायकाः॥ रचितांजलयोराजन्नेमुश्चमुनिस
त्तमं॥ १२॥ ततःस्तुतिःपरिश्रुतःसमुपेत्यतपोनिधौ॥ ननामपार्थोरुतस्यकिरीटनार्कवर्चसा॥ १३॥ आशी
र्भिरभिनंद्याथराजानंमुनिपुंगवः॥ प्रश्रयावनतंसाम्नासमुवाचस्मतामिति॥ १४॥ तमासीनंनरपतिंमहर्षिः प्रीतमानसः॥ उवाचराजनीत्युक्तासुखेनतवकेन्वपा॥ अस्माकमेवराजेंद्रवनेवन्येनजीवतां॥ ग्राम्यं
मृगसधर्माणांयेनकेनापिवर्तितुं॥ १६॥ अरण्येनागराणांतुस्थितिरत्यंतदुःसहा॥ अनभ्यस्तादृराजेंद्र
नतुसर्वादृदुष्करं॥ १७॥ वनवासपरिक्लेशभवान्यंत्सानुगोशकृत्॥ आप्तस्तुभवतोनूनंसागोरवसमुन
तिः॥ १८॥ इत्युक्तस्तेनमुनिनासराजाप्रीतिपूर्वकं॥ प्रदूसंनिचतंभूयोवचनंप्रत्युभाषत॥ ब्रह्मन्कृमिन
याज्ञयादृष्टस्तेयादृशोमहान्॥ अस्माभिःमोहमायेनविस्मितंसकलंजगत॥ २०॥ भवत्प्रभावसंजातवि
भवोहतचेतसः॥ इतोनगंतुमिछंतिसैनिकानोमहामुने॥ २१॥ तादृशानांजगतिदृप्रभावंरूपसंपदि भो

भिश्रियंतेसर्वदानंअचिंत्यंब्रह्मवर्चसं॥ २२॥ नैवचित्रंतवविभोदाक्षोतिनपशोभवान्॥ ध्रुवंकर्तुहिलोकानां
मचरुद्राग्निनर्यक्रमात॥ २३॥ सदृष्टास्तेतपःसिधिःमहतालोकपूजिता॥ गमिष्यामिपुरोब्रह्मन्ननुजानातुमांभ
वान्॥ २४॥ वसिष्ठउ०॥ इत्युक्तःस्तेनसमुनिःकार्तवीर्येणसादरं॥ संभावयित्वानितरांतथेतिप्रत्यभाषत॥ २५॥
मुनिनासमनुज्ञातोविनिक्रम्यतदाश्रमात॥ मेन्येःपरिवृतःसर्वैःसंप्रतस्थेपुरांप्रति॥ २६॥ सराजाश्चितया
मासमनसापथिपार्थिवः॥ अद्भुतपसःसिधिर्लोकविस्मयदायिनी॥ यथालब्धेहरीधेनुःसर्वकामदुघावरा
॥ किंमेसकलराज्येनयोगक्षेमावाप्यतत्पराः॥ २८॥ गोरत्नभूतापृथ्वेयेनमुनिवरःस्थिता॥ अनयोत्पादितानूनं
संपत्स्वर्गसदामपि॥ २९॥ नूनंमेदृमाप्यकंपरत्रैलोक्यपूजितं॥ अस्याधेनोरहंमन्येफलानाप्तेतिपोडश॥ ३०
इत्येवंचिंतयानंतंपश्चात्रभ्येत्यपार्थिवः॥ चेदृगुत्तमब्रवान्मंत्रीकृतांजलिपुटस्तदा॥ किमर्थंराजशार्दूलपुरीप्र
तिगमिष्यति॥ क्षितेननश्चराज्येनपूर्यंवाकिंफलंतव॥ ३२॥ गोरत्नभूतान्नृपतेर्यावद्वेनुर्नचाल्यते॥ वर्ततेनार्ध
मपितेराज्यंश्रेयंतवप्रभो॥ ३३॥ अन्यच्चदृष्टमाश्चर्यंमयाराजन्श्रुणुष्वतत्॥ भवानीज्ञाततोज्ञानीमतोज्ञाश्च
तथास्त्रियः॥ ३४॥ प्रासादाविविधाकारा धनंवादृष्टसंक्षयं॥ धनोत्तस्याक्षणेनैवविलीनंपश्यतोसम॥ ३५॥
तत्तपोननमेवासीद्दानंराजसत्तम॥ एवंप्रभावासायस्यतस्याकुंदुर्लभंभवेत॥ तस्माद्रत्नमहंसत्वेनस्वीकर्तु
व्याहुगोरत्नयां॥ यादृतेतुमतंकर्तुंमाख्येयमनुजोविभिः॥ ३७॥ राजोवाच॥ एवमेवाहमप्येनांनजानामीत्य
सांप्रतं॥ ब्रह्मस्वतापहर्तव्यमितिमेशंकतेमनः॥ ३८॥ एवंब्रुवंनराजानमिदमाहपुरोहितः॥ गर्गोमुनिम
तांश्रेष्ठोगर्हयंनिवभूपते॥ ब्रह्मस्वंनापहर्तव्यंआपद्यपिकथंचन॥ ब्रह्मस्वसदृशंलोकेकुर्जरंनेहविद्य
ते॥ ४०॥ विषहत्युपयोक्तारंशस्त्रमेकंहतत्रयः॥ कुरुसमूलंदहतिब्रह्मस्वारणिपावकः॥ ४१॥ अनिर्णयं
मिरंलोकेब्रह्मस्वंदुर्जरंविषं॥ पुत्रपौत्रांतकंलोकेविषाकंकटुपार्थिव॥ ४२॥ ऐश्वर्यमूढंहृमनःप्रभूणामस
दात्मना॥ कंनामासत्रकुरुतेनैश्वर्यंहृब्रह्मलोभितं॥ ४३॥ वरान्यरत्नामृतेकोन्यःविनादानान्नृपोत्तमं॥ आदा

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

नोचितयानोद्विजश्लाघेभिवांछति॥ ५४॥ ईदृशस्त्वंमहाबाहोकर्मसज्जननिंदितं॥ माकृथास्त्वंधिलोकेषुपशोरिव
क्रतव॥ ५५॥ वेत्तिवेदनिज्ञानस्त्वंवदान्यानांमहीभुजां॥ यशांसिकर्मणातेनसांप्रतंमाध्यनाशय॥ अहोनुजीवि
नःकिंचितभर्तारंव्यसनार्णवे॥ तत्यजसदसन्मुद्धामज्जपत्यनयोन्मुखा॥ ५७॥ श्रियाहिकुर्वन्पुरुषस्यचेत्यविचेत
न॥ तन्मातातुप्रसूतिश्चराजासद्योविषीदति॥ ५८॥ अज्ञातमुनयोमंत्रीराज्ञानमुनयोबुधो॥ आत्मनासहदुर्बुद्धि
र्कोहनोस्विमज्जयेत॥ तस्मात्वंराजशार्दूलमूढस्यनयवर्त्मनि॥ मत्तमन्यस्यदुर्बुद्धेर्नानुवर्तितुमर्हसि॥ ५९॥ एवं
हिवदतस्तस्यस्वामिश्रेयस्करंवचः॥ आक्षिप्यमंत्रीराजानमिदंभूयोह्यभाषत॥ ५१॥ ब्राह्मणोयंसज्ञातीयहि
तमेवसमीक्षते॥ मदंतीराज्यकार्याणिहिनेर्तुंनशक्यते॥ ५२॥ राज्ञैवराज्यकार्याणिवेद्यातिस्वमनीषया॥ वि
नोवेभोजनादानेकार्यंवेत्तिनवेदति॥ ५३॥ ब्राह्मणानावमंतव्यावेदनीयश्चनित्यशः॥ प्रतिग्राह्यणीयश्चनाधि
क्षेपाक्षितंक्वचित॥ तस्मात्सीदत्यतोधेनुंप्रयाहिवपुरंनृप॥ नोचेद्राज्यंपरित्यज्यगच्छस्वतपसेवनं॥ ५५॥ क्षमाव
तंब्राह्मणानांहेतुःक्षत्रस्यपार्थिव॥ प्रसह्यहरणेवापिनाधमरतेभविष्यति॥ ५६॥ प्रसह्यहरणेदोषंयाहिसंप
श्यसेनृप॥ दत्वामूल्यंगवाश्वाद्यमृषेर्धेनुःप्रगृह्यतां॥ स्वीकर्तव्याहिसाधेनुर्याचितःसंप्रदास्यति॥ अथवागोहि
रण्याद्यंयदन्यदभिवांछितं॥ ५८॥ संगृह्यविप्रोविपुलंधेनुंतांप्रतिदास्यति॥ अनुपेक्ष्यंमहद्बलंराज्ञांवेभूतिमिच्छ
ता॥ ५९॥ इतिमेवर्ततेबुद्धिकथंवा मन्यतेभवान॥ राजोवाच॥ गत्वात्वमेवतांविप्रंप्रसाद्यचविशेषतः॥ ६०॥ इत्ता
चाभीप्सितंतेतस्मैतांगामानयमत्रिक॥ वसिष्ठउ०॥ एवमुक्तास्ततोराज्ञासमंत्रीविधिचोदिता॥ ६१॥ निरत्यप्रय
योद्विजमदग्नेरथाश्रमं॥ गतेतुनृपतौतस्मिन्नृतब्राह्मणसंयुतः॥ ६२॥ समीक्षनयनार्थायरामोपिप्रय
योवनं॥ ततःसमंत्रीसबलःसमासाद्यतदाश्रमं॥ प्रणम्यमुनिशार्दूलंइदंवचनमब्रवीत॥ चंद्रगुप्तउ०॥ ब्रह्मन्प
तिनाहंतेराज्ञानुभविरत्नभाक्॥ ६४॥ रत्नभूताचधेनुःसाभवेद्रागेश्रीश्चतत्समाः॥ तस्माद्रत्नंसुवर्णंवामूल्यमु
क्तायथोचित्त॥ ६५॥ आदायगोरत्नभूतांधेनुमंदातुमर्हसि॥ जमदग्निरु०॥ होमधेनुरियंमह्यंनदातव्याहि

कस्यचित॥ ६६॥ राजाचदान्यःसकथंब्रह्मस्वमभिवांछति॥ मंत्र्युवाच॥ रत्नभोक्तेनरपतिर्धेनुंतेप्रतिकांक्षति
गचायुतेनतस्मात्वंतस्मैतांदातुमर्हसि॥ जमदग्निरु०॥ क्रयविक्रययोर्नाहंकर्ताजातुकथंचन॥ ६८॥ हविर्धानी
त्वमेतस्माद्भीत्सदेदातुमिच्छसा॥ मंत्र्युवाच॥ राजार्धेनाथवाब्रह्मन्नसकृत्केनापिभूभृतः॥ ६९॥ देहिधेनुंमिमांमे
कांतत्तश्रेयोभविष्यति॥ जमदग्निरु०॥ जीवन्नाहंतुदास्यामिबालवत्स्याविदुर्मते॥ ७०॥ गुरुणायाचितंकांतंव
चसान्यपतेपुनः॥ मंत्र्युवाच॥ तमेवत्वेच्छयाराज्ञेदेहिधेनुमुहूर्त्तया॥ ७१॥ यथाबालेमृतायांतस्यांत्वंकिंक
रिष्यसि॥ जमदग्निरु०॥ दातादिज्ञानांनृपतिःसंपद्यंत्याद्धरिष्यति॥ ७२॥ विप्रोहंकिंकरिष्यामिस्वेच्छावित्तर
णंविना॥ वसिष्ठउ०॥ इत्येवमुक्तःसंक्रुद्धःसमंत्रिपापचेतनः॥ प्रसह्यतांसोरेभेमुनेरत्नस्यपयस्विनीं॥ ७३
॥ ॥ इतिश्रीब्रह्मोउपुराणेमध्यमभागेऽष्टषष्टितमोध्यायः॥ ६८॥ ॥ वसिष्ठउ०॥ जमदग्निस्ततोभूयस्त
मुवाचरुषान्वितः॥ ब्रह्मस्वंनावहर्तव्यंपुरुषेणविजानता॥ १॥ प्रसह्यगांमेहरतोराजसस्यतुदुर्मतेः॥ आयुर्जीनेप
रिक्षीणंनसतेहंकरिष्यति॥ २॥ बलादिच्छसियत्तेतत्नशक्येकथंचन॥ स्वयंवायादिसायुक्तेहिनश्यत्युसपार्
थिवः॥ दानेविनापहरणंब्राह्मणानांतपस्विनां॥ गतायुर्योर्जुनादन्यःकोन्विच्छतिजिजीविषुः॥ ४॥ वसिष्ठउ०
इत्युक्तस्तेनसंक्रुद्धःसमंत्रीकालचोदितः॥ बध्वातांगांदृढैःपाशैर्वेचकर्षबलान्वितः॥ ५॥ जमदग्निरथक्रो
धात्भार्गवक्रमंप्रचोदितः॥ रुरोधतंयथाशक्तिर्विकर्षंतंपयस्विनीं॥ ६॥ जीवंनप्रतिमोक्ष्यामिगामेनामित्य
मर्षितः॥ जग्राहसहदंकंठेबाहुभ्यांतामहामुनिः॥ ७॥ ततःक्रोधपरीतात्मावेद्रगुस्तांनिबर्हणः॥ उत्सा
रयध्वमित्येनमादिदेशससैनिकान॥ ८॥ वसिष्ठउ० अप्रधृष्यंतमंत्र्योक्तमृषिंराजाकिंकराः॥ भर्त्रातयो
प्रसह्येनंपरिवव्रुःसमंततः॥ ९॥ दंडैःकृपाभिश्मगर्जांविजघ्नतश्चमुष्टिभिः॥ तेसमुत्सारयन्धेनोःसद्
रतरमतिक्रांत॥ १०॥ सतदाहन्यमानोपिन्यधितःक्षमयान्वितः॥ नचकुधेक्रोधनलंसतांहिपरमंधनं॥ ११
सतत्रक्तःस्वतपसासंहर्तुमपिरभितुं॥ जगत्सर्वंक्षयंतस्याचिंतयन्नप्रचुकुधे॥ १२॥ सपूर्वंक्रोधनोत्यर्थमात

र्थैप्रसादितः॥ रामेणाकुंठतोनित्यंशांतएवमहातपाः॥१३॥ सदह्यमानः सूभरंशंचूर्णितांगास्थिबंधनः॥ निश्चवा
तमहातेजाधरण्यांगतचेतनः॥१४॥ तस्मिन्मुनौनिपतितेसदारात्माविशंकितः॥ किंकरानाहराच्छीघ्रंधेनोरान
यनेचलान॥१५॥ ततःसवत्सांतांधेनुंबध्वापाशैर्दृढैर्नरैः॥ कशाभिरभिहन्यंतः चक्रुश्चानिताउया॥१६
आरुह्यमाणाबहुभिः कशाभिर्गुरुरपि॥ हन्यमानाभृशंतैश्चचक्रुधेचपयस्विनी॥१७॥ व्यथितातिक
शापातैः क्रोधेनमरुतान्विताः॥ आरुह्यपाशानहृदानात्मानममोचयत॥ विमुक्तपाशबंधासासर्वतोभि
रुताच्चलैः॥ हुंकारवंप्रकुर्वाणसर्वतोघ्नपतद्रुषा॥१९॥ विषाणखुरवुच्छाग्रैरभिहन्यसमंततः॥ राजामंत्रिव
लंसर्वेव्यद्रावयदमर्षिता॥२०॥ विद्राव्यकिंकरात्सर्वानंतरेवपयस्विनी॥ पश्यतांसर्वभूतानांगगनंप्रत्य
पद्यत॥२१॥ ततस्तेभग्नसंकल्पाः संभग्नक्षत्रवित्रहाः॥ प्रसह्यबध्वातद्वत्संजग्मुरेवतिनिर्घृणाः॥२२॥पय
स्विनीविनावत्संरुदंतीत्वाकिंकरैः सह॥ सपाषाणस्तरसारुद्धः संनिधिंसमुपागमत॥२३॥ गतासमीपंस्वपतेः
प्रणम्यासेप्रशंसरुत्॥ तद्दुःखंतमशेषेणव्याचचक्षेसमाध्वसः॥२४॥ ॥इतिश्रीब्रह्मोरपुराणेउमामहे
श्वरसंवादेमध्यमभागेअर्जुनोपाख्यानेएकोनसप्ततितमोध्यायः॥ ६९॥ ॥श्रीवसिष्ठउ॥ श्रुत्वैतन्स
कलंराजाजगत्स्रष्टावधाद्विधिं॥ ऊहिरन्वेताःसूभरांश्चिंतयामासनेकधा॥१॥ अहोमेसन्नशंसस्यलोकयोर
भयोरपि॥ ब्रह्मस्वहरणेवोढातद्रूप्याचातिगर्हिता॥२॥ अहोनाश्रोषमस्याहंब्राह्मणस्यविजानतः॥ व
चनंतर्हिताज्ञांवाविमृद्यात्मागतत्रयः॥३॥ इतिसंचिंत्यपत्रेचहृदयेनविदूयता॥ स्वपुरंप्रतिचक्रामसबल
ःसानुगस्ततः॥४॥ पुरेव्रजतिगतेराज्ञितस्मिन्सपरिवारके॥ आश्रमात्मरुसाराजनविनिश्चसरेणुका॥५॥
अथसक्षतसर्वांगरुधिरेणपरिप्लुतं॥ निश्चेष्टंपतितंभूमौददर्शपतिमात्मनः॥६॥ ततःसाविह्वलंम
त्वाभर्तारंगतचेतनं॥ अन्वारुहतेवाग्निनामूर्छितान्यपतद्भुवि॥७॥ चिरादिवपुनर्भूमेरुत्थायातीवदुः
खिताः॥ पतितोत्थायसाभूयः स्वरंरुरोदह॥८॥ विरुक्तापत्रसात्यर्थंधरणीधूलिधूसरः॥ अश्रु

पूर्णमुखीदीनापतिताशोकसागरे॥९॥ हानार्थंप्रियधर्मस्यदक्षिण्यामृतसागरा॥ ह्याधिगत्यंतशांतत्वनेवकांक्षन
महृद्गा॥१०॥ आसनाद्भृशंक्रांतःसहसाव्यसनार्णवे॥ क्षित्वानाथामगाधेद्रांकप्रयातोसिमानद॥११॥ सतांसम
पदेमेत्रसुखितांदुःखयासह॥ असिपत्रत्वमेकाकीतत्रमानेतुमर्हसि॥१२॥ दृष्ट्वात्वामीदृशीवस्थामखिराहृदयंम
म॥ नदीर्यतेमहाभागकथिनाःखलुयोषितः॥ इत्येवंविलपंतीसारुदंतीचमुहुर्मुहुः॥ चुक्रोशरामरामेतिभृ
शंदुःखपरिप्लुता॥१४॥ तावद्रामोपिसवनात्समिद्भारसमन्वितः॥ अकृतव्रह्मसयुक्तः स्वाश्रमामन्यवर्तत॥
१५॥आगछंनेयसंसीतांमित्तानिबहूनिशः॥ पश्यन्मुहुर्मुहुर्हृदयस्तूर्णंप्रायाश्रमंविभुः॥ तमायांतमभिप्रेक्ष्य
रुदतीसाभृशंपुरा॥ नचीभूतेवशोकेनप्राहदुःखेनकापुनः॥१७॥ रामस्यपुरतोगछन्भर्तृव्यसनपीडिता॥
उभाभ्यामपिहस्ताभ्यांमुहुरंसमताडयत॥ मार्गाविदितवृत्तांतः सम्यग्रामोपिमातरं॥ कुररीमिवशोकार्तां दृ
ष्ट्वादुःखमुपेयिवान॥१९॥ धैर्यभारोपिमेधाचीदुःखशोकपरिप्लुतः॥ नेत्राभ्यामश्रुपूर्णाभ्यांतस्थौभूमावध
ोमुखः॥२०॥ततथागतमालोक्यरामंप्राहकृतांजलिः॥ किमिदंभद्रंशशाईदृनेतत्तेष्युपपद्यते॥२१॥ नत्वा
दृशंमहाभागभृशंशोचंतिकुत्रचित॥ धृतिमंतोमहांतस्तुदुःखंकुर्वंतिमद्विधे॥२२॥ शोकःसर्वेंद्रियाणां
हिपरिशोषप्रदायकः॥ त्यजशोकंमदाद्वोद्यनतत्पात्रंभवादृशः॥२३॥ एहिकामुष्यकार्याणांनूनमेकंनरो
धकः॥ शोकस्तस्यावकाशंतंकथंहृदिनियच्छसि॥ तत्वंधैर्यधनोभूत्वापरिसांत्वममातरं॥ रुदंतीनव
वेधव्यशंकापरिप्लुतचेतनां॥२५॥ नेदागमनमस्तीहव्यतीक्रांतस्यवस्तुनः॥ तस्मादेतांतमखिलंत्यक्त्वाकृत्यं
विचिंतय॥२६॥ इत्येवंसांत्वमानस्यतेनदुःखसमन्वितः॥ रामःसंस्तंभयामासस्वनेवात्मानमात्मना॥
दुःखशोकपरीतांहिरेणुकांरुदन्मुहुः॥ त्रिःसप्तकृत्वोहस्ताभ्यामुरंसमताडयत॥२८॥ तावद्रुदंतिकंरा
मःसमभेत्याश्रुलोचनाः॥ रुदंतीमरुमेचेतिसांत्वयामासमातरं॥२९॥ उपावाचातुयनेदुःखात्भर्तृशोकप
रीतया॥ त्रिःसप्तकृत्वोयादृदंत्वयावक्षः समाहृतं॥३०॥तावत्सव्यमृतस्मात्क्षत्रजातमशेषतः॥ हनि

ध्येभविसर्वत्रसत्यमेतन्ब्रवीमिते॥३२॥तस्मात्वंशोकमुत्सृज्यधैर्यमातिष्ठसांप्रतं॥नात्रचेन्नमायातमतिक्रांतस्य
वस्तुन॥इत्युक्तारेणकांतेनभर्त्रादुःखान्वितापथी॥शुक्राधैर्यंततोमालंब्यतथेतिप्रत्यभाषत॥३३॥ततोरामोमहा
आदुःखितःसहसोद्दरेः॥अग्नेःसत्कर्तुमारेभेदहनंराजन्यथाविधिः॥३४॥भर्त्रेशोकपरीतांगीरेणुकापिदृढव्रता॥
पुत्रान्सर्वान्समाहूयइदंवचनमब्रवीत॥३५॥ रेणकोवाच॥अहंवःपितरंपुत्राःस्वर्गतंपुण्यशालिनं॥अनुगंतुमि
च्छामितन्मेनुज्ञातुमर्हथ॥३६॥असह्यदुःखंवैधव्यंसहमानाकथंपुनः॥भर्त्राविरहितातेनप्रवर्तिष्येविनिंदि
तः॥तस्मादनुगमिष्यामिभर्तारंहृदितेमम॥यथातेनप्रवर्त्तिष्येयशस्वापिसहानिशं॥३८॥इत्युक्तामितमेवाग्नि
संप्रविश्यचिताद्दिव॥भर्तारंमभविष्यामिपितृलोकप्रियातिथिः॥३९॥अनुवादमतेतत्वभवद्भिस्तत्वकर्म
णा॥प्रतिभूयनवक्तव्यायदमत्प्रियमिच्छया॥४०॥इत्येवमुक्त्वावचनंरेणकादृढनिश्चया॥अग्निंप्रविश्यभर्तो
रमनुगंतुमनोदधे॥४१॥एतस्मिन्नेवकालेतुरेणुकांततपोसहः॥समाभाव्यातिगंभीरावागुवाचाशरीरिणी॥
हेरेणुकेसुतनयोगीरंमवद्दितावचः॥माकार्षीःसाहसंभद्रेप्रवेक्ष्यामिप्रियंतव॥४३॥साहसेनेचकर्तव्यः
केनाप्यात्महितेषिणा॥नमर्तव्यंतयासर्वाजीवनभद्राणिपश्यता॥४४॥तस्माद्धैर्यधनाभूत्वाभवत्वंकाल
कांक्षिणी॥निमित्तमंतरीकृत्यकिंचिद्देवशुचिस्मिते॥अचिरेणैवभर्तातेभविष्यतिसचेतनः॥उत्पंनजीविते
नत्वंकामंप्राप्स्यसिशोभने॥४६॥भावित्रीचिरात्रायबहुकल्याणभाजनं॥ ॥वसिष्ठउ०॥इतीतद्वचनंप
श्रुत्वाधृतिमालंब्यरेणुका॥४७॥तद्वाक्यगौरवाद्धैर्यंवरपुत्रनयाश्रिते॥ततोनीत्वापितुर्देहमाश्रमाभ्यंत
रेमुने॥४८॥शापयित्वानिवासेतुपरितःसमुपाविशत॥तेषांतत्रोपविष्टानांमन्नद्दस्तात्मचेतसां॥४९॥नि
मित्तानिशुभान्यासन्ननेकानिमहांतिच॥तेनतोकिंचिदास्वस्तचेतसेमुनिपुंगवा॥५०॥निषेदुःसहितामा
त्राकांक्षितोजीवितंपितुः॥एतस्मिन्नंतरेराजन्भृगुवंशधरोमुनिः॥५१॥विधेर्वशेनमतिमांस्तत्रागच्छद्य
दृच्छया॥अथर्वणोनिधिःसाक्षात्वेदवेदांगपारगः॥५२॥ सर्वशास्त्रार्थवित्प्राज्ञः सकृत्सुरवंदितः॥

मतसंज्ञोविनीविद्यायोवेदमुनिदुर्लभं॥५३॥यमाहूतात्मधेदेवैरुशापयदहनवान॥शस्त्रमोक्षनसंयेनरा
ज्योराज्यफलप्रदं॥५४॥प्राणानमनुजावंतिसर्वेघापीदृपार्थिवाः॥मतश्चाश्रमयःसाधप्रविष्टोतन्महामुनिः॥५५
दृदर्शतत्रवस्त्रस्तानसर्वा- इतिश्रीब्रह्मोत्तरपुराणेश्वतुर्दशाः॥ ॥जमदग्निरु० अत्रैहत्याहिंभूतरुवं
तातदोषोपशांतये॥प्रायश्चित्ततत्तत्वंद्यावक्तुमर्हसि॥१॥इत्युक्तःप्राहपितरंरामोमतिममांवरः॥प्रा
यश्चित्तंतुतद्योग्यंत्वमेवार्हतुमर्हसि॥२॥जमदग्निरु०॥व्रतैश्चनियमैश्चैवकर्षयंदेहमात्मनः॥शाकमूल
फलाहारोद्वादशाब्दंतपश्चर॥३॥ ॥वसिष्ठउ०॥इत्युक्तःप्रणिपत्येनंमातरंचभृगूद्वहः॥प्रययौतपसे
राजननुज्ञातप्रणसंयुतः॥४॥सगत्वापर्वतवरंमहेंद्रमरिकर्शनः॥कृत्वाश्रमपदंतस्मिन्नतपस्तेपेसुदुश्चरं॥
॥५॥व्रतेस्नपानदुःख--परिप्लुतान॥अथतेतुभृगुंदृष्ट्वावंद्यस्यपितरंमुदा॥६॥उत्थायाश्रुमुखादुश्चापि
सत्कृत्यपरमासनं॥सचासीभिस्तुतान्सर्वानभिनंद्यमहामुनिः॥७॥पप्रच्छकिमिदंब्रूतंतत्सर्वंतेन्यवेदय
न्॥तच्छ्रुत्वासभृगुःश्रीघ्रंजलमादायमंत्रवित॥८॥संज्ञाविन्याविद्ययातांसिषेचप्रोक्षरन्निदं॥सद्यस्यतप
सोवीर्यंममाविशुभमस्तिच॥९॥तेनासोजीवयनशीघ्रंप्रसुप्तइवचोत्थितः॥एवमुक्तेशुभेवाक्येभृगुणा
साधुकारिणा॥१०॥समुत्तस्थावथार्चीकःसाक्षाद्भृगुरिवापरः॥दृष्ट्वातत्रस्थितंविद्वंभृगुवंशस्यपितामहं
११॥ननामभक्त्यान्पतेकृतांजलिरुवाचह॥जमदग्निरु०॥धन्योहंकृतकृत्योहंसकुलंजीवितंचमे॥१२॥म
त्पशोचरणेनतपसासुरनमस्कृतो॥भगवानकिंकरोम्यद्यशुश्रूषांतवमानद॥१३॥पुनीह्यात्मकुलंस्वस्यच
रणांबुकणैर्विभो॥इत्युक्तासहसानाप्यरामेणार्घंमुदान्वितः॥भगवानकिंकृतंतेनराज्ञादुष्टेनपातकं॥यस्या
स्तिथ्यद्दिकृतवानअद्दसम्याविधानतः॥१५॥साधुबुध्यासदृष्ट्वात्माकिंचेकारमहामते॥ ॥वसिष्ठउवाच॥
एवंसएषोमातमानंभृगुः सर्वविदीश्वरः॥चिरंध्यात्वासमालोच्यकारणंप्राहभूपते॥१६॥भृगुरुवाच॥श्रु
णुतातमहाभागवीजमस्याद्दुकर्मणः॥येनवैकृतवान्न्यायंसर्वत्रस्यतवानघ॥१७॥ग्रामःपुरावसिष्ठेनना

म्नार्थसमहीपतिः॥ द्विजापराधतोमूढवीर्यतोवंनाशिष्यते॥१८॥ तत्कथंवचनंतस्यभविष्यत्यन्यथामुने॥ अयं
रामोमहावीर्यप्रसह्यनरपुंगवं॥१९॥ हनिष्यतिमहाबाहुप्रतिज्ञांकृतान्पुरा॥ यस्माद्गुरुःप्रतिहतंत्वयामा
तर्ममाग्रतः॥ एकविंशतिवारंहिभस्मादुःखपरीतया॥ त्रिःसप्तकृत्वोनिःक्षत्रंकरिष्येपृथिवीमिमां॥२१॥ श्रुतो
यंबार्यमाणोपित्रापित्रानिरंतरं॥ भावितोर्थस्यचबलात्करिष्यत्येवमानद॥२२॥ सतराजामहाभागोद्रु
ह्यंतापर्युपासिता॥ दत्तात्रेयाद्वरंरंशालब्धयोधोमहामतिः॥२३॥ साक्षाद्भोगमहात्मानंचतुर्धापातकंभ
वेत॥ एवमुक्तोमहाराजसभृगुर्ब्रह्मणःसुतः॥२४॥ यथागतंययौविद्वान्भविष्यंकालपर्ययात॥ ॥इति
श्रीब्रह्मांडपुराणेउमामहेश्वरसंवादेमध्यमभागेभार्गवचरित्रेसप्ततितमोध्यायः॥ ७०॥ ॥ ॥
सगरउ॰॥ ब्रह्मपुत्रमहाभागवरभार्गवचेष्टितं॥ यच्चकारमहावीर्योराजन्कुद्धोहृकर्मणा॥१॥ वसिष्ठउ॰
गतेतस्मिन्महाभागेभृगोपित्परायणः॥ रामःप्राचाचसंकुद्धोमुंचतश्वासान्मुहुर्मुहुः॥२॥ पराशरउ॰
अहोपश्यत्वमूढत्वंराज्ञोह्युत्पथगामिनः॥ कार्तवीर्यस्ययोविद्वांश्चक्रेब्रह्मपदोद्यमं॥३॥ देवोदुर्बलवन्मन्येयत
प्रभावाक्षरोगिणः॥ शुभंवाप्यशुभंसर्वेप्रकुर्वंतिविमोहिताः॥४॥ श्रुण्वंतुऋषयःसर्वेप्रतिज्ञाक्रियतेमया॥का
र्तवीर्योनिहत्याज्ञोपितुर्वैरेप्रसाधये॥५॥ यदिराजासकैरःसर्वैरिंद्राद्यैर्दानवैस्तथा॥ रक्षिष्यतेतथाप्येनं
संहरिष्यामिनान्यथा॥६॥ एवमुक्तंसमाकर्ण्यरामेणसमहात्मना॥ जमदग्निरुवाचेदंपुत्रंसाधुसभाषणं
॥७॥ जमदग्निरु॰॥ श्रुणुरामप्रवक्ष्यामिसतांधर्मंसनातनं॥ यश्रुत्वामानवाः सर्वेज्ञायंतेधर्मकारिणः॥
॥८॥ साधवोयेमहाभागासंसारान्मोक्षकांक्षिणः॥ नकस्मोचितप्रकुर्व्यंतिनिंदितास्तारिताअपि॥९॥
क्षमापनामहाभागयेचदातास्तपस्विनः॥ तेषांचैवाक्षयालोकाः सततंसाधुकारिणां॥१०॥ यस्तुदुष्टेसु
दंडंचैवंचसाधुचतादृतः॥ नचक्षोभमवाप्नोतिसमसाधुःपरिकीर्त्यते॥११॥ ताडयेताडयंतेयोनचसाधुः
समापभाक्॥ क्षमयाहीणतांप्राप्तःसाधवोब्रह्मणावयं॥१२॥ नरनाथवधेतातपातकंसमहद्भवेत्॥ तस्मा

न्निवारयेत्वाद्यक्षमांकुरुतपश्चरन्॥१३॥ वसिष्ठउ॰ एवंपित्रासमादिष्टंविज्ञायनरपंरुन॥ रामःप्रोवाचपितरंक्ष
माशीलमरिंदमः॥१४॥ परशुरामउ॰॥ श्रुणुतातमहाप्राज्ञविज्ञप्तिंममसांप्रतं॥ भवताऽमडदृष्टः साधूनां
क्रमहात्मनां॥ क्षमाःसाधुजनेषुगुरुधीश्वरभावनैः॥ कर्तव्योदुष्टजनेषुनक्षमाःसुखदाभवेत॥१६॥ तस्मा
दस्यवधःकार्यःकार्तवीर्यस्यवैमया॥ इत्थंतांमाननीयाद्यसाधयेवैरमात्मनः॥१७॥ जमदग्निरु॰॥ श्रुण
राममहाभागवचोममसमाहितः॥ करिष्यसियथाभावितथात्वंवान्यथाभवेत॥१८॥ इतोव्रजंतंब्रह्माणं
एछतांनहिनाहितं॥ सयद्दृष्यतिविभुस्तत्कर्तानात्रसंशयः॥१९॥ वसिष्ठउ॰॥ एवमुक्तःसपितरंनमस्कृत्य
महामतिः॥ जगामब्रह्मणोलोकंमागम्यप्राकृतैर्जनैः॥२०॥ दृष्ट्वाब्रह्मणोलोकंशांतकुंभविनिर्मितं॥ स्वर्ण
प्राकारसंयुक्तंमणिस्तंभैर्विभूषितं॥२१॥ तत्रापश्यत्समासीनंब्रह्माणमपितोजसं॥ रत्नासिंहासनेरम्येरत्नभू
षणभूषितं॥२२॥ सिद्धैश्चैवमुनीश्चैववेष्टितंध्यानतत्परैः॥ विद्याधराणांनृत्यंचपश्यंतंसस्मितंमुदा॥२३
तपसोफलदातारंकर्तारंजगतांविभुं॥ परिपूर्णतमंब्रह्मध्यायंतंयतमानसं॥२४॥ गुह्ययोगंप्रवीन्वंतंभक्त
देवेषुसंततं॥ दृष्ट्वातमव्ययंभक्त्याप्रणनामभृगुद्रुहं॥२५॥ सदृष्ट्वावंदितंरामंमाशीर्भिरभिनंद्यच॥ पप्रच्छ
कुशलंवत्सकथमागमनंकथा॥२६॥ संपृष्टोविधिनारामः प्रोवाचाखिलमादितः॥ श्रुत्वातः कार्तवीर्यस्यपितुःस्व
स्यमहात्मनः॥ तच्छ्रुत्वासकलंब्रह्माविज्ञातार्थोपिमानदः॥ उवाचरामंधर्मिष्ठंपरिणामसुखावहं॥२८॥ प्र
तिज्ञाऽर्द्धभवत्सयोभवानकृतवानरुषा॥ सृष्टिरेषाभगवतः संभवेतकृपयावटो॥२९॥ जगत्स्थंमयात
तसंक्षोभेततद्वत्तया॥ तन्नात्रकारणंचैवप्रतिज्ञाभवताकृता॥३०॥ त्रिःसप्तरुत्वोमहीभूपांकर्तुमच्छसिमे
दिनीं॥ एकस्यराज्ञोदोषेणपितुःपरिभवेनच॥३१॥ ब्रह्मक्षत्रियविट्शूद्रैः सृष्टिरेषासनातनी॥ आविर्भूता
तिरोभूत्वाहरेरेवपुनःपुनः॥३२॥ अत्यर्थात्प्रतिशोतुभावित्राप्राकृतेनच॥ यद्यायासेनसेकार्यासिद्धिर्भ
वितुमर्हति॥३३॥ स्त्रियःक्लीबंप्रयास्यंतिशिवस्यास्तामवाग्रहः॥ एथिव्यावद्दवोभूपाः संतिसंकुलकंकराः॥विने

वासांमहेशस्यकोवातान्हंतुमीश्वरः॥ बिभ्रतःकवचान्यंगेशक्तांश्चापिदुरासदः॥ ३५॥ उपायंकुरुयत्नेनजयर्वाज्ञं
शुभावहं॥ उपायेतुसमारब्धेसर्वेसिध्यंत्युपक्रमाः॥ ३६॥श्रीवत्समंवेंकवचंगरुडवत्समुरुद्गतं॥ दुर्लंघ्यंवैस्म
वंसेजःशिवशक्तिंविजेष्यति॥ ३७॥ त्रैलोक्यविजयंनामकवचंपरमाद्भुतं॥ यथाकथंचिद्विज्ञाप्यशंकरंकभट्ट
रंभं॥ ३८॥ प्रसंनःसगुणेरुद्रंयदुपांडुरानवत्सलं॥ दिव्यंपाशुपतंचापिदास्यतेवनसंशयः॥ ३९॥ ॥इतिश्री
ब्रह्मोउपुराणेवायुप्रोक्तेमध्यमभागेभार्गवचरित्रेएकसप्ततितमोध्यायः॥ ७१॥ ॥वसिष्ठउ॥ ब्रह्मणा
वचनंश्रुत्वासप्रणम्यजगद्गुरुं॥ प्रसंनचेताःसभ्रशंशिचरुकेंद्रजगामह॥ १॥ लक्षयोजनमूर्ध्वेचन्नलोकाः
द्विरुक्षणं॥ अथनिर्यचनीयंचयोगिगम्यंपरात्परं॥ २॥ वेकुंठोदक्षिणेयस्मात्गोरीलोकश्चवामतः॥ यद्दक्षेध्रुवलो
कश्चसर्वलोकपरंतपः॥ ३॥ नवोवीर्यगतीरामःशिवलोकंददर्शच॥ उपमानेनरहितंनानाकौतुकसंयुतं॥ ४॥ वसनि
यत्रयोगींद्राःसिद्धाःपाशुपताःशुभाः॥ कोटिकल्पतपःपुण्याःशांतानिर्मत्सराजनाः॥ ५॥ पारिजातमुरेरैंद्रैः
शोभितंकामधेनुभिः॥ योगेनयोगिनासर्वंलक्षयांशंकरेणहि॥ ६॥ त्रिलिंगनागुरुणाचमेनहृत्वाविश्वकर्मणा
॥ सरोवरशतैर्दिव्यैपद्मरागविराजितैः॥ ७॥ शोभितंचातिरम्यंचसंयुक्तंमणिवेदिभिः॥ सुवर्णरत्नरचित
प्रकारेणसमावृतं॥ ८॥ अत्यूर्ध्वमेरवस्यार्द्धेखंडेक्षीरनिभंवरं॥ चतुर्द्वारसमायुक्तंशोभितंमंदिरैःशुभैः॥
॥ ९॥ रत्नसोपानयुक्तैश्चरत्नस्तंभकवाटकैः॥ नानाचित्रविचित्रैश्चशोभितैःसुमनोहरैः॥ १०॥तन्मध्यभा
वनेरम्येसिंहद्वारोपशोभिते॥ ददर्शरामोधर्मात्माविचित्रमिवसंगतः॥ ११॥ तत्रस्थितोद्वारपालोददर्शाति
भयंकरः॥ महाकरालदंतास्योविकृतारक्तलोचनः॥ १२॥ दंष्ट्राग्रोद्भूतकिरणमहाचक्रपरश्वधः॥ बिभ्रतिभू
षितांगेचव्याघ्रचर्मांबरंवरं॥ त्रिशूलपट्टिशधरोज्वलंतोब्रह्मतेजसा॥ तोदृष्ट्वामनसाभीतःकिंचिद्दूरविं
नीतवान्॥ १४॥ नमस्करोमिवामीशंशंकरंद्रष्टुमागतः॥ ईश्वराज्ञांसमादायमामथात्तुमर्हथ॥ १५॥ तोतु
तद्वचनंश्रुत्वागृहीत्वाज्ञांशिवस्यच॥ प्रवेशमाज्ञांददतुश्चवानुचरोचतः॥ १६॥ सतद्दत्तामनुज्ञाप्यप्रविवेशांतरं

मुदा॥ तत्रातिरम्यांसिद्धौघैःसमाकीर्णांसभांद्विजः॥ १७॥ दृष्ट्वाविस्मयमापेदेस्फुरंधवकुलाविभो॥ तत्रापश्य
च्छिवंशांताग्निनेत्रंचंद्रशेखरं॥ १८॥ त्रिशूलशोभितकरंव्याघ्रचर्मांबरंवरं॥ विभूतिभूषितांगंचनागयज्ञोपवी
तिनं॥ १९॥ आत्मारामंपूर्णकामंकोटिसूर्यसमप्रभं॥ पंचाननंदशभुजंभक्तानुग्रहविग्रहं॥ २०॥ योगासनंप्र
योन्वंतंसिद्धैभ्यस्तर्कमुद्रया॥ स्तूयमानंचयोगींद्रैःप्रमथैःप्रमदैर्मुदा॥ भैरवैर्योगिनीभिश्चनंदिरुद्रगणेस्तथा॥ मूर्धानंनामतंदृष्ट्वारामःपरमयामुदा॥ २२॥ वामभागेकार्तिकेयंदक्षिणेचगणेश्वरं॥ नंदीश्वरंमहाका
लंवीरभद्रंचतत्पुरः॥ २३॥ क्रोडंदुर्गांगृहीतभुजांदृष्ट्वानत्वातथाग्रतः॥ स्तोतुंप्रचक्रमेविद्वान्गिरागद्गदयाविभुं॥
॥ २४॥ नमस्येशिवमीशानंविभुंव्यापकमव्ययं॥ भुजंगभूषणंवीरंनरकपालस्रगुज्ज्वलं॥ २५॥ योविभुः सर्वलो
कानांसृष्टिस्थितिविनाशकृत्॥ ब्रह्मादिरूपधृग्ज्ञेयस्तत्तद्वेदरूपार्णवं॥ २६॥ वेदाननाज्ञायास्तोतुंभवाञ्जनस
गोचरं॥ ज्ञानबुद्धेरथंचनिष्कारंनाम्यहं॥ २७॥ शक्राद्यःसुरगणाऋषयोमनवोसुराः॥ नयंविदुर्यथात
त्वेतंनमामिपरात्परं॥ २८॥ यस्यांशांशेनसृज्यंतेलोकाःसर्वेचराचराः॥ लीयंतेत्रपुनर्यस्मिन्तंनमामिजगन्म
यं॥ २९॥ यस्यैसंकोपसंभूतोदहतेखिलं॥ सोर्ध्वलोकंसपातालंतंनमामिहरंपरं॥ ३०॥ एथिवीजलवन्ही
रनभोयज्ञेंदुभास्करः॥ मूर्तयोष्टौजगत्पूज्यास्तंयज्ञंप्रणमाम्यहं॥ ३१॥ यःकालरूपोजगदादिकर्तावाताद्यथ
गृह्यधरोजगन्मयं॥ हूतापुनारुद्रवपुःस्वयंतंतंकालरूपंहरणंप्रपद्ये॥ ३२॥ इत्येवमुक्तारततुभार्गवोमु
दापापतंतस्यांहिसमीपआतुरः॥ ३३॥ क्षाम्यतंवामकरेणकालयादक्षंपधान्मूर्ध्निकरंकृपार्णवः॥ ३३॥ आ
र्गाभिरेनंद्य--- सादरंनिवेशयामासगणेशपूर्वतः॥ ३४॥ वाचमाभाष्यचाप्युमांकृपार्द्रदृष्ट्याखिलंकाम
पूरकः॥ ३५॥ शिव उ॥ कुलंवदोकस्यकुलेप्रसूतःकिंकार्यमुद्दिश्यभवानिहागतः॥ विनिर्भयंहंतवभक्ति
भावतःप्रीतःप्रदास्यामिवरोमनोगतं॥ ३६॥ इत्येवमुक्तःसभृगुर्निजात्मनाहरेणविश्वार्तिहरेणसादरं॥ पुनश्च
नत्वाविबुधाधिपतिंगरुत्मासमुद्रसमुद्वान्वसतरं॥ ३७॥ ॥परशुराम उ॥ भर्गोस्वामिन्कुलेजातोऽहमद्यनिसुतो
विभो॥ रामोनामजगद्वंद्यत्वामहंशरणंगतः॥ ३८॥ येकार्यार्थंमहानाथतवसांनिध्यमागतः॥ तंप्रसाधय

MEMORIAL
OF HAU DAJI

विश्वेश्वरांछितंकाममेवमे॥३९॥ मृगयामासगतस्यापिकार्तवीर्यस्यभूपतेः॥ आतिथ्यंकृतवांदेवजमदग्निःपि
तामम॥३९॥ राजातंसबलंकोभात्पातयामासमंदधीः॥ साधेनुस्तंमृतंदृष्ट्वागवांलोकंजगामह॥४०॥ रा
ज्ञानशोचन्मरणंपितुर्ममनिरागसः॥ जगामस्वपुरंपश्चान्माताभेप्रारुदद्भृशं॥४१॥ तज्ज्ञात्वालोकंकृतज्ञोभ्य
गुर्नत्प्रपितामहः॥ आजगाममहादेवस्तदभ्यागतोवनान॥ मयासहसुदुःखार्तानभ्रातॄन्मात्रासहैवमे॥
सांत्वयित्वासमंत्रज्ञोजीवयित्वापितरंमम॥४३॥ अनागतेभृगोर्मातुर्दुःखनाहंप्रकोपितः॥ प्रतिज्ञांकृतवान्देवसं
क्षयन्मातरंसकं॥४४॥ त्रिःसप्तकृत्वोयदुरक्षत्रियंमातरात्मनः॥ ॥वसिष्ठउ॥ इत्येवंतद्वचः श्रुत्वादृष्ट्वादुर्गो
मुखंहरः॥४५॥ बभूवानग्रवदनश्चिंतयानक्षणंतदा॥ एतस्मिंनंतरेदुर्गाविस्मिताप्राहमद्भुतं॥४६॥ उवाच
चमहाराजभार्गवंवरसाधकं॥ तपसिन्द्विजपुत्रश्रेष्ठानिर्भयांकर्तुमिछसि॥४७॥ त्रिःसप्तकृत्वःक्रोधेनसाहसंत्ये
महाबलः॥ हंतुमिछसिनिःक्षत्रंसहस्रार्जुनमीश्वरं॥ श्रीमंगलंलक्ष्मायेनरावणोपिनिराकृतः॥ तस्मेप्रदत्तंद
त्तेनश्रीहरेःकवचंपुरा॥४९॥ ब्राह्मिरव्यर्थवीर्यांचितंकथंहंतुमिछसि॥ शंकरंकरुणासिंधुःकर्तुचाप्यन्यथाविभुः
॥५०॥ नचान्यः शंकरात्पुत्रतत्कार्यंकर्तुमीश्वरः॥ अथदेव्याअनुमतिंप्राप्यशंभूदयार्णवः॥५१॥ अभयंदादुदया
वाचाब्रह्मदग्निसुतंविभुः॥ ॥शिवउ॥ अहंभवतिविप्रत्वंममलोकेभूयोमहांचापिकरिष्यसि॥ ५२॥
हत्युक्त्वांशंकरस्तस्मैददौमंत्रंसुदुर्लभं॥ त्रैलोक्यविजयेनामकवचंपरमाद्भुतं॥५३॥ नागपाशंपशुपतंब्रह्मां
स्त्रांचसुदुर्लभं॥ नारायणास्त्रमाग्नेयंवायव्यंवारुणंतथा॥ ५४॥ गांधर्वंगारुडंचैवब्रह्मणास्त्रंमहाद्भुतं॥ग
दांखड्गंचपरशुंशूलंदंडमनुत्तमं॥५५॥ ब्रह्मास्त्रंसर्वमाममखिलंप्रदृष्टःसंबभूवह॥ नमस्कृत्यशिवंशांतंदुर्गा
लकंदंगणेश्वरं॥५६॥ परिक्रम्ययथौरामः पुष्करंतीर्थमुत्तमं॥ सिद्धंकृत्वाशिवोक्तंमंत्रंकवचंचमुत्तमं॥ ५७॥
साधयामासनिखिलंस्वकार्यंभृगुनंदनः॥ निहत्यकार्तवीर्यंतं ससैन्यंसकुलंमुदा॥ ५९॥ विनिवृत्तोयदुप्रा
णान्पितुःस्वस्यभृगूद्वहः॥ ६०॥ ॥ इतिश्रीब्रह्मांडपुराणेवायुप्रोक्तेमध्यमभागेभार्गवचरित्रेऽष्टत्रिंशत्तमोध्यायः॥

॥ ॥सगरउ॥ श्रुतंसर्वंमुनिश्रेष्ठकीर्त्यमानंत्वयाविभो॥ कवचंवदसर्वत्रैलोक्यविजयप्रदं॥१॥ वसिष्ठउ॥
शृणुवत्सप्रवक्ष्यामिकवचंपरमाद्भुतं॥ मंत्रंचसिद्धिदंशस्त्रसाधकानांसुखावहं॥२॥ गोपीजनपदस्यांतेव
क्षुभाग्यसमुच्चरेत्॥ स्वाहांतोयंमहामंत्रोदशार्णोमुक्तिभक्तिदः॥ ३॥ सप्तत्रिंशत्स्वयंकृष्णःपंक्तिश्छंदउदा
हृतं॥ देवताकृष्णउद्दिष्टोविनियोगोरिवत्कासये॥ ४॥ त्रैलोक्यविजयस्याप्यकवचस्यप्रजापतिः॥ ऋषिश्छं
दश्चजगतीदेवोरामेश्वरःस्वयं॥ ५॥ त्रैलोक्यविजयप्राप्तौविनियोगःप्रकीर्तितः॥ प्रणवोमेशिरःपातुश्री
कृष्णायनमःसदा॥ ६॥ पायाल्लोकपालंकृष्णायस्वाहेतिसततंमम॥ कृष्णेतिपातुनेत्रेमेकृष्णस्वाहेतितारकं॥
हृत्येनमइत्येषभूलतांपातुमेसदा॥ ॐगोविंदायस्वाहेतिनासिकांपातुसंततं॥ ८॥ गोपालायतथागंडंपातु
मेसततंमतु॥ क्लींकृष्णायनमःकर्णौपातुकृत्यतरुर्मम॥ ९॥ श्रीकृष्णायनमःपातुनित्यंमेधरयुग्मकं॥ ॐगो
पीशायस्वाहेतिदंतपंक्तिंममावतु॥ १०॥ श्रीकृष्णेतिरहस्यंमेपातुनेत्राक्षरोमतुः॥ ईश्रीकृष्णायस्वाहेतिजिह्वां
चिबुकंपातुमेसदा॥ ११॥ रामेश्वरायस्वाहेतितालुकंपातुमेसदा॥ राधिकेशायस्वाहेतिकंठंमेपातुसर्वदा॥
॥१२॥ नमोगोपीगतेशायश्रीवामेपातुसर्वदा॥ ईंगोपेशायस्वाहेतिस्कंधौपातुसदाममं॥ १३॥ नमःकि
शोरवेषायस्वाहाएषंममावतु॥ ऽदरंपातुमेनित्यंमुकुंदायनमोमतु॥ १४॥ ह्रींश्रींक्लींकृष्णायस्वाहाकरोपा
तुसदाममं॥ ईंविष्णवेनमःस्वाहाबाहुयुग्मंममावतु॥ १५॥ ईंह्रींभगवतेस्वाहानखपंक्तिंममावतु॥ नमोना
रायणायेतिनखरंध्रंममावतु॥ १६॥ ह्रींश्रीपद्मनाभायनाभिंपातुसदाममं॥ ईंसर्वेशायस्वाहेतिकेशान्म
मसदावतु॥ १७॥ नमःकृष्णायस्वाहेतिब्रह्मरंध्रंसदावतु॥ ईंमाधवायस्वाहेतिभालंमेसर्वदावतु॥ १८॥
ईंह्रींश्रीरविकेशायकटिंममसदावतु॥ नमोगोपीजनेशायऊरूपातुसदाममं॥ १९॥ ईंनमोदैत्यनाशाय
स्वाहेत्यवतुजानुनी॥ यशोदानंदनायेतिनमोंताजंघमेवतु॥ २०॥ रासारंभप्रियायेतिस्वाहांतोह्रीममावतु
॥ ॐराधाप्रियायस्वाहेतिसकलांगानिमेवतु॥ २१॥ परिपूर्णनमःकृष्णःप्राच्यांमेसर्वदावतु॥ स्वयंगोलोकनाथा
यमाग्नेयांदक्षिरक्षतु॥ २२॥ पूर्णब्रह्मस्वरूपश्चदक्षिणेमांसदावतु॥ नैर्ऋत्यांपातुमांकृष्णपश्चिमेपातु

मांदूरिः॥२३॥ गोविंदः पातुवायव्यां मुत्तरेरसिकेश्वरः॥ ईशान्यांमेसदापातुरुंदावनविहारकृत्॥२४॥ रुंदाप्राणेश्वरः श्रीवत्सपातुमामूर्ध्वदेशतः॥ सर्वेचमाधवेभ्यः पातुबलिध्वस्तोमहाबलः॥२५॥ ज्वलेरुक्मचांतरिक्षेनृसिंहपातुमांसदा॥ स्वप्नेजागरणेचैवपातुमांमाधवःस्वयं॥२६॥ सर्वांतरात्मानिर्लेपः पातुमांसर्वतोविभुः॥इतितेकथितंभूपसर्वपापविनाशनं॥२७॥ त्रैलोक्यविजयंनामकवचंपरमद्भुतं॥ ममाश्रुतंशिवमुखात्प्रवक्ष्यंतवकस्यचित्॥२८॥ गुरुमभ्यर्च्यविधिवत्कवचंधारयेत्तुयः॥ कंठेवादक्षिणेबाहौसोपिविष्णुर्नसंशयः॥२९॥ससाधकोवमेध्यतत्रचाग्नेरमंडिते॥ यादिस्यात्सिद्धकवचोजीवन्मुक्तोनसंशयः॥३०॥निश्चितंकोटिवर्षाणांपूजायाःफलमाप्नुयात्॥ राजसूयसहस्राणिवाजपेयशतानिच॥३१॥ महादानानियान्येवभुक्त्वापिप्रदक्षिणा॥त्रैलोक्यविजयस्यास्यकलांनार्हंतिषोडशीं॥३२॥ व्रतोपवासनियमाः स्वाध्यायाध्ययनंतथा॥ स्नानंचसर्वतीर्थेषुनास्यहेतिकलामपि॥३३॥ सिद्धत्वममरत्वंचदास्यत्येवरराधिप॥ यादिस्यात्सिद्धकवचः सर्वेप्राप्नोतिनिश्चितं॥३४॥ सःभवेत्सिद्धकवचोदनुजक्षत्रपेतुयः॥ योभवेत्सिद्धकवचोविजयीसभवेध्रुवं॥३५॥ राज्यंदेयंशिरोदेयंप्राणदेयास्वभूपते॥एतत्तुकवचंवत्सनदेयंमकुटेपच॥३६॥ मयाप्रकाशितंयत्तेएतेषांत्राणकारणात्॥ममाज्ञाकारणाच्चैवतद्विधिकुरुभास्कर॥३७॥ इदंश्रुत्वातुकवचंचक्रवर्तीभवान्भवः॥३८॥ ॥इतिश्रीब्रह्मोंडपुराणेमध्यमभागेभार्गवचरित्रेत्रिसप्ततितमोध्यायः॥ ॥७३॥ ॥सगरउवाच॥ ब्रह्मपुत्रमहाभागमहाभागमहामुनेयद्गुह्यतमं॥ यदिदंकवचंमह्यंप्रकाशितमनामयं॥१॥ ओर्वेणानुग्रहीतादंशुतास्त्रोयदनुग्रहात्॥भवतःकृपापात्रंज्ञातोहंमधुनाविभो॥२॥ रामेणभार्गवेंद्रेणकार्तवीर्योन्यपोगुरुः॥ यथासमाधितोवीरस्तन्मेविस्तरतोवद॥३॥ कृपापात्रंमदंतस्यराज्ञोरामःक्षयस्यच॥ऊभौतेसमरेवीरौज्ञातुंदाक्ष्यंतवेगुरौ॥४॥ ॥वसिष्ठउ॥ शृणुराजन्प्रवक्ष्यामिचरितंपापनाशनं॥ कार्तवीर्यस्यभूपस्यरामस्यचमहात्मनः॥५॥ सरामःकवचंलब्ध्वा मंत्रंचैवगुरोर्मुखात्॥ चकारसाधनंतस्यभक्त्यापरमयायुतः॥ भूमिशय्यात्रिषवणंस्नानसंध्या

परायणः॥ उपवासपुष्करेगज्जनशतवर्षमतंद्रितः॥७॥ समित्पुष्पकुशादीनिद्रव्याण्यादायदुंदुभेगो॥ आनीयकानाद्रुषभयछेत्तागतव्रताः॥ समतेध्यानसंयुक्तोरामोमतिमतांवरः॥ आराधयामासविभुंकृष्णंकल्मषनाशनं॥९॥ तस्यैवंयतमानस्यरामस्यजगतीपते॥ गतंवर्षशतंतत्रध्यानयुक्तस्यनित्यदा॥१०॥ एकदातुमहाराजरामःस्नातुंगतोमहान्॥ मध्यमंपुष्करंतत्रददर्शाश्चर्यमुत्तमं॥११॥ मृगएकःसमायातोमृग्यायुक्तःपलायितः॥ व्याधस्यमृगयांप्राप्तोधर्मतप्तोतिपीडितः॥१२॥ पिपासितोमहाभागज्वलयानसमुत्सुकः॥ रामस्यपश्यतस्तत्रसरसस्तटमागतः॥ पश्चान्मृगीसमायाताभीतासाचकितेक्षणा॥ ऊभौतौपिबतस्तत्रजलंशंकितमानसौ॥१४॥ तावत्समागतोव्याधोबाणपाणिर्धनुर्धरः॥ सदृष्वातत्रसंविष्टोरामंभार्गवनंदनं॥१५॥ अरुतव्रणसंयुक्तंस्थेदूरकृतेक्षणः॥ सचिंतयामासतदाशंकितोभृगुनंदनः॥१६॥ अयंरामोमहावीरोदुष्टानामंतकारकः॥कथमेतस्यहन्मेतोपश्यतोमृगयाविनौ॥१७॥ इतिचिंतासमाविष्टोव्याधोराजन्यमत्तमः॥ तंछेत्तंत्रेवरामस्यभयात्संकुलमानसः॥ रामस्तुतोमृगींदृष्वापिबंतींसमयंजलं॥ तर्कयामाससमेधावीकिमत्रभयकारणं॥१९॥ नेयंव्याघ्रसेनादेवनचव्याधोहिदृश्यते॥ केनेतोकारणेनाद्यशंकितोचकितेक्षणौ॥२०॥ अथवाभृगुजाद्यैर्हन्यतेस्मार्गजाकृतेक्षणा॥ येनेतोजलपाणेपीपश्यतेचकितेक्षणौ॥२१॥ नेतावत्कारणंचान्यत्किंतुवैरंभयात्तुरौ॥ कस्येतस्मिन्नसर्वोगोकंपयुक्तोयतस्तिमौ॥२२॥ एवंसंचिंत्यमतिमानसस्रोमध्यमपुष्करे॥ शिष्येणसंयुतोरामोयावतोचापिसंस्थितौ॥ पीत्वाजलंततस्तौतुदृष्वछायाममारुतौ॥ रामंदृष्वामहात्मानंकथांतोचक्रतुर्मुदा॥२४॥ भृगुरुवाच॥ कांतचान्नेवतिष्ठावोयावद्रामोन्नसंस्थितः॥ अस्यवीरस्यसांनिध्येभयंनेवावयोर्भवेत्॥२५॥ अत्राप्युत्थाप्यचैनंमाधोत्थावयोःप्रहरिष्यति॥ दृष्मात्रेहिमुनिनाभस्मभूतोभविष्यति॥२६॥ इत्युक्तेवचनेमृग्यारामदर्शनतुष्टया॥ मृगश्चोवाचहर्षेणसमाविष्टःप्रियास्वकं॥२७॥ एवमेवमहाभागेयद्ब्रवीषिभामिनी॥ज्ञानेनमपिरामस्यप्रभावंसुमहात्मनः॥२८॥ योयंसदृश्यतेचास्यपार्श्वेदिव्यःकृतव्रणः॥ सचानेन

नमस्तुभागस्नातोत्थाप्रभयातुरः॥२९॥ अयंरामोमहाभागेज्ञमग्निसुतोनुजः॥ चिनरंकार्तवीर्येणदृष्ट्वाचैव
तिरस्कृतं॥३०॥चकारातितरांक्रुद्धःप्रतिज्ञांन्यपघातिनीं॥तत्पूर्तिकामोस्वगमनत्रस्तलोकपुरंस्वयं॥३१॥ सत्रस्त
दृष्टयश्चैनंगिरिकूटंव्रजेतिह॥तस्यतद्वांसमाज्ञायगामाक्षोनिरसंनिधिं॥३२॥प्रोवाचाखिलरत्नांतंराज
श्चाप्यात्मनःपितुः॥ सरुषापातुमर्हादेवःसभाज्यभृगुनंदनं॥३३॥ दशोक्षस्यसमंत्रमभेधंकवचंतथा॥
स्तोत्रंपाशुपतंचास्त्रमन्यास्त्रग्रामसंचय॥विसर्जयामासमुदादत्वाशैलमंत्रसाधनं॥तस्तोमात्रगतिभद्रं
मंत्रसाधनतत्परः॥३५॥नित्यंजपतिधर्मात्माकृष्णस्यकवचंकथीः॥शतवर्षाणिचाप्यस्यगतानिसुमहात्मनः
॥ मंत्रसाधनतोभद्रेनचतत्सिद्धिमेतिह॥अत्रास्तिकारणंभक्तिसाचवैष्णविधामता॥३७॥उत्तमामध्यमाचै
वकनिष्ठातरुक्षणे॥शिवस्यनारदस्यापिशुकस्यचमहात्मनः॥३८॥ अंबरीषस्यराजर्षेरंतिदेवस्यमारुते
ः॥बलिर्बिभीषणस्यापिप्रह्लादस्यमहात्मनः॥३९॥ उत्तमाभक्तिरेवास्तिगोपीनामुद्धवस्यच॥वसिष्ठादिमुनी
शानांमन्वादीनांशुभेक्षणे॥४०॥ मध्यमाभक्तिरेवास्तिप्राकृतान्यज्ञनेषुसा॥मध्यभक्तिरयंरामोनित्यंयम
पराश्रणः॥४१॥ सेवनेगोपिकाधीनांतेनसिद्धिंनचागतः॥ वसिष्ठउ०॥इत्युक्तावीरनंकांतंसाम्रगीद्दृष्टमान
सा॥४२॥पुनःपप्रछभक्तेषुलक्षणंप्रेमदायकं॥ मृग्युवाच॥ साधुकांतमहाभागबत्सलोकेकिकंप्रिय॥४३
॥दृष्टानंतवकथंसंजातंतद्वंधुना॥ मृग्युवा०॥शृणुविप्रेमहाभागेज्ञानंपुण्येनजायते॥तत्पुण्यमघसं
ज्ञातंभार्गवस्यास्यदर्शनात्॥४५॥ पुण्यात्माभार्गवश्चायंकृष्णभक्तोजितेंद्रियः॥ गुरुशुश्रूषकोनित्यंनि
त्यंनैमित्तिकादरः॥४५॥ अतोस्यदर्शनाज्ज्ञातंज्ञानंमेवैवभामिनि॥त्रैलोक्यस्थितसत्वानांशुभाशुभनिद
र्शकं॥४६॥अत्रैवविदितेमेभूद्रामस्यास्यमहात्मनः॥ चरितंपुण्यदंचैवपापघ्नंश्रुणुतामिदं॥४७॥य
श्चकरिष्यतेचैवतदधिज्ञानमोक्षणं॥योत्तमाभक्तिराख्याताताविनानैवसिध्यति॥४८॥ कवचंमंत्रस
हितंह्यपिवर्षायुतायुतैः॥ यंयंभागंवोभद्रेह्यगरुयानुग्रदंलभेत॥४९॥ कृष्णप्रेमामृतंनामस्तोत्रमु

त्तमभक्तिदं॥तात्कालिकंभव्यतेसिद्धंमंत्रस्यकवचस्यच॥५०॥ समुनिर्ज्ञाततत्वार्थः सानुकंपोभयप्रदः॥उपदेक्ष्य
तिचैवैनंतत्वज्ञानंमहावरं॥५१॥श्रीकृष्णचरितंसर्वंनामभिर्ग्रथितंयतः॥ कृष्णप्रेमामृतस्तोत्रात्तास्यते
स्यमहामतिः॥ ततः संसिद्धकवचोराजानंहैहयाधिपं॥हत्वासपुत्रामात्यंचसमृद्धंहृद्धलवाहनं॥५३॥त्रिःस
प्तकृत्वोनिर्भूपांकरिष्यत्यवनिंसत्ये॥ वसिष्ठउ०॥एवमुक्त्वामृगोराजन्विरराममृगीततः॥आत्मनोमृगभा
वस्यकारणंस्मृतवांश्चहृः॥५५॥ ॥ इतिश्रीब्रह्मांडपुराणेमध्यमभागेभार्गवचरित्रेचतुःसप्ततितमोध्या
यः॥ ७४॥ ॥ ७॥ सगरउ०॥ मुनेपरमतत्वज्ञध्यानज्ञानार्थकोविद॥ भगवद्भक्तिसंलीनमानसानुग्रहंकु
रुतः॥१॥ त्वत्तोमविमहाभाग यतःश्रुतिसत्कथा॥श्रुत्वामृगमुखात्सर्वंभार्गवस्यविचेष्टितं॥२॥ भूतंभव
द्भविष्यंचनारायणकथान्वितं॥ पुनःपप्रछकृष्णार्थंतन्मेवदसविस्तरं॥३॥ वसिष्ठउ०॥ शृणुराजन्यवस्थामि
मृगस्यचरितंमहत्॥यथादृष्टंतयासर्वंवर्णयामाससत्वरित्॥४॥श्रुत्वातुचरितंतस्यभार्गवस्यमहात्मनः॥भू
यःपप्रछतंकांतंज्ञातंतत्वार्थममादरात्॥५॥ मृग्युवा०॥ साधुसाधुमहाभागकृतार्थस्तेनसंशयः॥ यदस्यदर्शनो
तेथज्ञातंज्ञानमतींद्रियं॥६॥अथातश्चात्मनः सर्वममाचिवदकारणं॥ कर्मणायेनसंप्राप्तावाचांनिरजनीप्रभो
॥७॥इतिवाक्यंसमाकर्ण्यप्रियायाः समृगस्वयं॥ वर्णयामासचरितंमृग्याश्चैवात्मनस्तदा॥८॥ मृगउ०॥शृणु
प्रियेमहाभागेयथावांमृगतांगतौ॥ संसारेस्मिन्महाभागेभावोस्यभवकारणं॥९॥जीवस्यसदसद्घाद्विकर्मण्या
मागतः स्मृतिं॥ पुराद्रविडदेशेतुनानाऋद्धिसमाकुले॥१०॥ ब्राह्मणानांकुलेचाद्यजातः कौडिन्यगोत्रिणं॥पितामे
त्रिवरतोभून्नानाशास्त्रविशारदः॥११॥तस्यपुत्राश्चयंज्ञाताश्चत्वारोद्विजसत्तमाः॥ ऽयंशोणोनुजस्तस्यध
र्मस्यानुजयःपृथुः॥१२॥चतुर्थोहंप्रियेज्ञातोभूरिरित्याभिविश्रुतः॥ उपनीयक्रमात्सर्वान्पित्रेवरतोमहायशा॥
वेदानध्यापयामाससांगाश्चसहेरंबकान्॥चत्वारोवयसर्वेचवेदाध्ययनतत्परः॥१४॥ गुरुशुश्रूषणेयुक्ताज्ञाततत्वज्ञपरायणा॥ गत्वारण्यंकुलान्यंबुसमित्कुशमहोन्वहं॥१५॥आनीयपित्रेदत्वाथकर्मोध्ययनमेवहि॥

एकदानुशयंसर्वेसंग्रामाःपर्वतंवने॥१६॥ ओंद्रुंनामस्तोकाक्षीकृतमाक्षतरोहितं॥ सर्वेस्नात्वामहानद्यामुषसीप्रीत
मानसाः॥१७॥ दत्तार्घ्याःकृतजप्याश्चसमारुह्यानगोत्तमं॥ मृगैस्तमालैःप्रियकैःवनसेकोविदारकैः॥१८॥ सर
लार्जुनपूगैश्चसर्जूरनारिकेरकैः॥ जंबूभिःसदकारैश्चकट्फलैर्द्रुतिद्रुमैः॥१९॥ अन्येर्नानाविधैर्वृक्षैःपरार्थ
प्रतिपादकैः॥ स्निग्धच्छायैःसमाहृष्टनानापक्षिनिनादितैः॥२०॥ शार्दूलद्वारभिर्भल्लैर्गोऽर्कैर्मृगनाभिभिः॥ गजेंद्रै
सरभाद्यैश्चसेवितंकंदरागतैः॥ मल्लिकापाटलाकुंदकर्णिकारकदंबकैः॥ सुगंधिभिर्वृतंचान्यैर्वातोद्धूतपरागिभिः
२२॥ नानामणिगणाकीर्णनीलपीतसितारुणैः॥ शृंगैःसमुद्भिन्नतंचव्योमकेतुकसंयुतं॥२३॥ अत्युच्चपातध्व
निभिर्निर्झरैःकंदरोद्गतैः॥ गर्जंतमिवसंसक्तंव्याघ्रद्यैर्मृगपक्षिभिः॥२४॥ तत्रानिकेतुकाहृष्टहृष्योभ्रालरायय
॥ नस्मरामात्मनात्मानंविमुक्ताश्चपरस्परं॥२५॥ एतस्मिन्नंतरेचैकामृगीस्नागात्यपाश्रिता॥ निर्झरापातनिष्ठ्यूतसिपातुका
माजलंप्रिये॥२६॥ तस्मात्पिबंत्यास्तुजलंशार्दूलोतिभयंकरः॥ तत्रप्राप्तोयहस्तोजगद्गंतांभयावहः॥२७॥ अदूर
तस्यहरिणंपश्यन्भयेनप्रबलायितः॥ अत्युच्चंचप्राणप्राप्तोमृतश्चेनांमनस्मरन्॥ सास्मृत्वातंमृगीजातामृगस्त्वादमनुः
स्मरन्॥ ज्ञातोभद्रेनजानेवैकृगताभ्रातरोयज्ञा॥२९॥ एतन्मेस्मृतिमापन्नंचरितंतवचात्मनः॥ भूतंभविष्यंचतथाश्रुण
भद्रेवदाम्यहं॥३०॥ दूरंवाप्यसेसरोनाम्नाधोदूरस्थितोभवत्॥ रामस्यास्यभयान्नोपिभक्षितोहरिणाधुना॥३१॥ प्रा
णात्यत्वाविधानेनस्वर्गलोकंगमिष्यति॥ भावाभ्यांतुजलंपीतंमध्यमेपुष्करेतिह॥ संदृष्टोभार्गवश्चायंसाक्षाद्विष्णु
स्वरूपधृक्॥ तेनानेकभवोत्पन्नंपातकंन्मेनशमागतं॥३३॥ अगस्त्यदर्शनंलब्ध्वाश्रुत्वालोकंगतिप्रदं॥ गमिष्यावःशुभा
ल्लोकानयेषुगत्वानशोचति॥३४॥ वसिष्ठ३०॥ इत्येवमुक्तासमृगप्रियायेप्रियदर्शिनः॥ विरराम्रसंनात्मापश्यन्राम
मनातुरः॥३५॥ भार्गवःश्रुतवांश्चेमंमृगोक्तंशिष्यसंयुतं॥ विस्मितोभूच्चराजेंद्रगंतुकामतिरुत्थाय॥ अकृतव्रणसं
युक्तोह्यगस्त्यस्याश्रमंप्रति॥ स्नात्वानित्यक्रियांकृत्वाप्रतस्थेहर्षितोभृशं॥३७॥ रामेणगच्छतामार्गेदृष्ट्वाधोमृतस्त
दा॥ संदृष्यसंप्रसारेणविस्मितेनमहात्मना॥३८॥ अध्यर्धयोजनंगत्वाकनिष्ठंपुष्करंप्रति॥ स्नात्वामध्याह्नकेसंध्या

वकारातिमुद्वहितः॥३९॥ हितंतदात्मनःप्रोक्तंमृगेणसविचारयन्॥ तावत्तत्रसंलग्नंमृगयुग्ममुपागतं॥४०॥पु
ष्करेतुजलंपीत्वाभिषिच्यात्मतनुंजलैः॥ पश्यतोभार्गवस्यागाद्दृगरुग्यात्रमसन्मुखं॥ रामेपिसंध्यांनिर्वर्त्यकुंभजस्या
श्रमंययौ॥ वियद्गतंपुष्करंतुपश्यंतोमहात्मनः॥४१॥ विप्रोःपद्मानिनागानांकुंडंसमर्षिसंस्तुतं॥ गत्वोपस्पृश्यभु
ज्यंभोजगामागस्त्यसंश्रयं॥४२॥ यत्रब्रह्मसुतारात्रन्समापीतासरस्वती॥ तत्संपूरयितुंकुंडान्अग्निहोत्रस्यवैविधे॥४३॥ तत्रतीरेशुभंपुण्यनानामुनिनिषेवितं॥ ददर्शमहदाश्चर्यंभार्गवःकुंभजाश्रमं॥ मृगैःसिंहैःमहद्गतैःसे
वितंशांतमानसैः॥ कुंजरैरर्जुनैर्नीलैःपारिभद्रध्वजैर्द्रुमैः॥४५॥ खदिरासनखर्जूरैःसंकुलंबदरीद्रुमैः॥ तत्रप्रवि
श्यवैरामोह्यकृतव्रणसंयुतः॥४६॥ ददर्शमुनिमासीनंकुंभजंशांतमानसं॥ स्तिमितोदसरःप्रख्यंध्यायंतंब्रह्मशा
श्वतं॥४७॥ कोश्यांशृष्यांमार्गकृतिवसंतंपल्वलोदरे॥ ननामचमहाराजस्वाभिधानंसमुच्चरन्॥४८॥ रामोस्मिज्ञ
मदग्न्योर्हंभवंतंद्रष्टुमागतः॥ तद्विद्धिप्रणिपातेननमस्तेलोकभावन॥ इत्युक्तवंतेरामंतुउन्मील्यनयनेमुनिः॥
दृष्ट्वास्वागतमुच्चार्यतस्मायासनमादिशत्॥५०॥ मधुपर्कंसमानीयाभ्यर्च्यमुनिपुंगवः॥ दृष्ट्वापप्रच्छकुशलं
तपसश्चकुलस्यच॥ सदृष्टस्तेनवैरामोयथोद्भवमुवाचह॥ भवत्संदर्शनादद्यकुशलंममसर्वगं॥५२॥ किंत्वेकं
संशयंजातंछिंधिसवचनान्मम॥ मृगश्चैकोमयादृष्टोमध्यमेपुष्करेविभो॥५३॥ तेनोक्तमखिलंस्वतंममभृ
तमनागतं॥ तच्छ्रुत्वाविस्मयोविष्टोभग्वच्छरणमागतः॥ पाहिमांकृपयानाथसाधयैतंमहामनुं॥ शिवेन दृ
ष्टंकवचंतमसाधयतोगुरो॥५५॥ कस्मस्यसमतीतंतुसाधितेदृग्रलं॥ नचासिद्धिमवाप्नोहंतन्मेब्रूहिकृपयाविभो॥५६॥ वसिष्ठ३०॥ एवंप्रश्नंसमाकर्ण्यरामस्यस्युमहात्मनः॥ क्षणंध्यात्वामहाराजन्मृगोक्तंतानवान्हृद्य
॥५७॥ मृगश्चापिसमायातंमृगयासहनिद्राश्रमे॥ श्रोतुंकस्मामतंस्तोत्रंसर्वंतत्कारणंमुनिः॥ विचार्यश्वासवर्ण
मासभार्गवंस्ववचोमृतैः॥५८॥ ॥इतिश्रीब्रह्मोत्तरपुराणेमध्यमभागेभार्गवचरित्रे७५अध्यायः॥ ॥
वसिष्ठ३०॥ अथगत्वासवैसर्वैकारणंप्रीतमानसः॥ उवाचभार्गवंरामंमगस्त्यकुंभसंभवः॥१॥ अगस्त्य३०॥

श्रृणुरामस्य भागकथयामिहितंतव॥ मंत्रस्यसिद्धियेतत्वंश्रीघ्रमेवसमाप्नुयाः॥२॥ भक्तेसुलक्षणंज्ञात्वात्रिविधा
यामहामते॥ योयंतेतनरस्यासिसिद्धिर्भवतिसत्वरं॥३॥ एकदाहमनुःश्रीमानंतदर्शनकांक्षया॥ पातालंनगरंजग्मु
: शोभितंपरयासुदा॥४॥ तत्रदृष्टामहाभागमयासिद्धसमंततः॥ मनकाद्यानारदाश्वगौतमोत्तावलिःकृतुः॥५॥
ऋभुर्हंसोरुणिश्चैवबाल्मिकीशक्तिरासुरिः॥ एतेन्येचमहासिद्धाकात्यायनमुखाद्विजाः॥ उपासंतउपासीनाज्ञाना
र्थंफणिनायकं॥ तंनमस्कृत्यनागेंद्रंमहासिद्धैर्महात्मभिः॥७॥ उपविष्टकथाकाले श्रुत्वानोवैस्मवोमुदा॥ येयंभू
मिर्महाभागभूतधात्रीस्वरूपिणी॥ निविष्टापुरतस्तस्याश्रुत्वंतीनाःकथाःसदा॥ यद्यत्पृच्छतिसाभूमिशेषंसाक्षान्
महाधरं॥९॥ श्रुत्वंतिऋषयःसर्वेतत्रस्थातद्नुग्रहात॥ मयातत्रश्रुतंवत्ससूक्ष्मप्रेमामृतंशुभं॥ लोकेतन्नप्रवक्ष्यामि
यस्यार्थेत्वमिहागतः॥ वाराहाद्यवतारणांचरितंपापनाशनं॥११॥ सुखदंमोक्षदंचैवज्ञानविज्ञानकारणं॥श्रुत्वा
सर्वंधरावत्सप्रहृष्टांतंधराधरं॥१२॥ उवाचप्रणताभूत्वाज्ञात्वंसूक्ष्मविचेष्टितं॥ ॥ धरण्युवाच॥ अलंकृतंज्ञान
पुंसंमपिनंदव्रजौकसां॥१३॥ तस्यदेवस्यसूक्ष्मस्यलोकानुग्रहधारिणः॥ नामयोपाधियुक्तानिनूतनामा
न्यनेकशः॥१४॥ तेषुनामानिमुख्यानिश्रोतुकामाचिरादहं॥ तदानिब्रूहिनामानिवासुदेवस्यवासुके॥१५॥ ततः
परतरंपुण्यंत्रिषुलोकेषुविद्यते॥ शेषउ०॥ वसुंधरेवरारोहेशृणुनामसहस्रकं॥१६॥ सर्वमंगलमूर्धन्यंम
णिमाद्यष्टसिद्धिदं॥ महापातककोटिघ्नंसर्वतीर्थफलप्रदं॥१७॥ समस्तजपयज्ञानांफलदंपापनाशनं॥श्रु
णुदेविप्रवक्ष्यामिनाम्नामष्टोत्तरंशतं॥ सहस्रनाम्नांपुण्यानांनिराकृत्यासुयत्फलं॥ एकावृत्यानुसूक्ष्मस्यनामे
कंतत्प्रयच्छति॥१९॥ तस्मात्पुण्यतरंचैतत्लोकेपातकनाशनं॥ नाम्नामष्टोत्तरशतस्यहि॥ मेधऋषिप्रियेछंदोनु
ष्टुपदेवतातुयोगः॥ सूक्ष्मप्रियावदः॥२०॥ ॐश्रीसूक्ष्मःकमलानाथोवासुदेवसनातनः॥ वसुदेवात्मजःपु
ण्यश्लोकोमानुषविग्रहः॥२१॥श्रीवत्सकौस्तुभधरोयशोदावत्सलोहरिः॥ चतुर्भुजातचक्रासिगदाशंखाद्यु
धः॥२२॥ देवकीनंदनःश्रीशोनंदगोपप्रियात्मजः॥ यमुनावेगसंहारिबलभद्रप्रियानुजः॥२३॥ पूतनाजी

वितहरःशकटासुरभंजनः॥ नंदव्रजजनानंदीसच्चिदानंदविग्रहः॥२४॥ नवनीतविलिप्तांगोनवनीतनटोनघः॥
नवनीतस्यमाहारीमुचुकुंदप्रसादकृत्॥२५॥ षोडशस्त्रीसहस्रेशस्त्रिभंगीमधुराकृतिः॥ शुकवाक्यामृताब्धीदु
ग्धवेदोगोविंदोदामोदरःपतिः॥२६॥ वत्सपालनसंचारीधेनुकासुरमर्दनः॥ तृणीकृततृणावर्तोयमलार्जुनभंजनः॥
उत्तालतालभेत्तात्मतालध्वजसमाकृतिः॥ गोपगोपीश्वरोयोगीसूर्यकोटिसमप्रभः॥२८॥ दुष्टारिष्टपरंज्यो
तिर्यादवेंद्रोयदूद्वहः॥ वनमालीपीतवासापारिजातापहारकः॥२९॥ गोवर्धनाचलोद्धर्तागोपालःसर्वपाल
कः॥ अजोनिरंजनःकामजनकःकंजलोचनः॥३०॥ मधुहामथुरानाथोद्वारकानायकोबली॥ वृंदावनांतसंचा
रीतुलसीदामभूषणः॥३१॥ स्यमंतकमणेर्हर्तानरनारायणात्मकः॥ कुब्जाकृष्णांबरधरोमायापुरुषपूरुषः॥
मुष्टिकासुरचाणूरमल्लयुद्धविशारदः॥ संसारवैरिकंसारीमुरारिनरकांतकः॥३३॥ अनादिब्रह्मचारीचकृष्णायस
नकर्षकः॥ त्रिशूपालशिरश्छेत्तादुर्योधनकुलांतकृत्॥३४॥ विदुराक्रूरवरदोविश्वरूपपरेश्वरः॥ सत्यवाक्सत्य
संकल्पसत्यभामारतोजयी॥३५॥ सुभद्रापूर्वजोविष्णुर्भीष्ममुक्तिप्रदायकः॥ जगद्गुरुर्जगन्नाथोवेणुवादविं
शारदः॥३६॥ वृषभासुरविध्वंसीबकारिर्वृणिवाद्धृत॥ युधिष्ठिरप्रतिष्ठातावर्हिबर्हावतंसकः॥३७॥ पार्थसा
रथिरस्यक्लेशनाशनगीतामृतमहोदधिः॥ कालीयफणिमाणिक्यरंजितश्रीपदांबुजः॥३८॥ दामोदरोयज्ञभोक्तादा
नवेंद्रोविनाशनः॥ नारायणःपरब्रह्मपन्नगाशनवाहनः॥३९॥ जलक्रीडासमासक्तगोपीवस्त्रापहारकः॥पु
ण्यश्लोकस्तीर्थपादोवेदवेद्योदयानिधिः॥४०॥ सर्वतीर्थात्मकः सर्वग्रहरूपीपरात्परः॥ इत्येवंसूक्ष्मदेवस्यनाम्ना
मष्टोत्तरंशतं॥ ४१॥ सूक्ष्मेनसूक्ष्मभक्तेनश्रुत्वागीतामृतंपुरा॥ स्तोत्रंसूक्ष्मप्रियकरंततस्तान्मयाश्रुतं॥ ४२॥सू
क्ष्मप्रेमामृतंनामपरमानंददायकं॥ अत्युपद्रवदुःखघ्नंपरमायुष्यवर्धनं॥४३॥ दानव्रततपस्तीर्थयत्कृतंतिदुस्त
रम्॥ पठतांश्रृण्वतांचैतत्कोटिकोटिगुणंभवेत्॥ पुत्रप्रदमपुत्राणांमगतीनांगतिप्रदं॥ धनापहृद्दरिद्राणां
नृपेक्षूनांजयावहं॥४५॥ त्रिशूलांगोकुलानांचपुष्टिदंपुष्टिवर्धनं॥ बालरोगग्रहादीनांशमनंदुष्टनाशकं॥ ४६

अंतेब्रह्मस्मरेणेदंभयतापत्रयापहं॥ आसिद्धेसाधकंभद्रेज्ञयादिकरतात्मना॥४७॥ कृत्स्नायश्चादवेंद्रायज्ञानमुद्रायया
गिने॥ नाथायरुक्मिणीशायनमोवेदांतवेदिने॥४८॥ इममंत्रंमहादेवीजपंनेवादिवानिशं॥ सर्वत्रह्यनुग्रहभाक्
सर्वप्रियतमोभवेत्॥४९॥ पुत्रपौत्रैःपरिवृतःसर्वसिद्धिसमृद्धिमान्॥ निषेव्यभोगनंतेपिकृष्णसायुज्यमाप्नुया
त्॥५०॥ ॥अगस्त्यउ०॥ एतावदुक्त्वाभगवाननंतोमूर्तिस्थसंकर्षणसंज्ञितोविभो॥ धराधरोलंजनताधरायेनि
र्दिश्यभूयोविरराममानद॥५१॥ ततस्तसर्वेमनकादयोयेसमाहितास्तत्परितःकथाद्दता॥ आनंदपूर्णेबुनिधौ
निमग्नाःसभाजयामासुरहोश्वरंतं॥५२॥ ऋषयईचुः॥ नमोनमस्तेखिलविश्वभावनप्रपंनभक्तार्तिहराव्ययात्म
न्॥ धराधरायाखिलपार्णवायशेषायविश्वप्रभवेनमस्ते॥५३॥ कृत्स्नामृतंनःपरिपायितंविभोविधूतपापाभव
तारुतावयं॥ भवाद्दशाहोतरपालयोविभोसमुद्धरंत्येवनिजंगन्दिसतंनात्॥५४॥ एवंनमस्कृत्यफणीद्रपादयोर्मनो
निधायारिलकामपूरयोः॥ प्रदक्षिणीकृत्यधराधरास्थितोसर्वोवयंस्वावसथानुपागताः॥५५॥ इतीतेभि
हितंरामःस्रोत्रंप्रेमामृताभिधं॥ कृत्स्नस्यपरिपूर्णस्यदृधकांतस्यासिद्धदं॥ इदंराममहाभागस्रोत्रंपरमदुर्लभं
॥५७॥ श्रुतंसाक्षाद्भगवतः शेषात्कथयतःकथा॥ यावंतिमंत्रतंत्राणिस्रोत्राणिकवचानिच॥५८॥ त्रैलोक्येता
निसर्वाणिसिध्यंतेवास्यशीलता॥ वसिष्ठउ०॥ एवमुक्तामहाराजकृत्स्नप्रेमामृतंस्तवं॥५९॥ यावद्भरत्सोत्तमु
निस्तावत्तत्सर्वानमागतं॥ चतुर्भिरद्भुतैःसिद्धैःकामरूपैर्मनोजवैः॥६०॥ अनुपातमथोत्थुत्यस्त्रीपुंसोदूरिणो
तरा॥ अगस्त्यचरणेनत्वासमारुरुहुर्मुदा॥६१॥ दिव्यदेहधरोभूत्वाशंखचक्रासिचिह्नितो॥ गतोन्यंवेश्मवं
लोकंसर्वदेवनमस्कृतं॥६२॥ पश्यतांसर्वभूतानांभार्गवागस्त्ययोस्तथा॥६३॥ ॥ इतिश्रीब्रह्मांडपुराणे
मध्यमभागेभार्गवचरित्रे॥७६॥ अध्यायः॥ ॥७॥ वसिष्ठउ०॥ दृष्ट्वापरशुरामस्तुतदाश्चर्यंमहाद्भुतं॥
जगादसर्वस्तांतंमगयोस्तुयथाश्रुतं॥१॥ तच्छ्रुत्वाभगवान्साक्षादगस्त्यकुंभसंभवः॥ मोदमानउवाचेदं भा
र्गवंपुरतस्थितं॥२॥ अगस्त्यउ०॥ श्रृणुरामममहाभागकार्याकार्यविशारद॥ हितंयदभिपद्येततत्कुरु

ASIATIC SOCIETY MEMORIAL

ष्वसमाहितः॥३॥ इतोविदूरेकमहत्सरोनंविस्मोःसदुर्लभं॥ यदानिपत्रद्दश्यंतेन्यस्तानिसुमहात्मना॥४॥ यत्रगंगा
समुद्भूतावामनस्यमहात्मनः॥ यद्दायात्कामतोलोकात्याद्धेस्कंधविनिग्रहे॥५॥ तत्रगत्वास्तवंचेदंमासमेकमन
न्यधीः॥ पठस्वनियमेनेवनियतोनियतात्मनः॥६॥ यत्तयाकवचंपूर्वमन्यस्तांसिद्धिमिछता॥ मुनीनांनियहा
र्थायतज्ञतेसिधिदंभवेत्॥७॥ वसिष्ठउ०॥ एवमुक्त्वागस्तेनरामःस्तोत्रंनिबद्धवान्॥ नमस्कृत्यमुनींशंतंनिर्ज
गामश्रमाद्बहिः॥ पुनस्तेनैवमार्गेणसंप्राप्यसरलंत्वरं॥ यत्रोत्तरान्यदन्यासान्निर्गतास्तर्णदीनृप॥९॥ तत्रप्रवा
हंकृत्वासावकृतब्रह्मसंयुतः॥ समंभसनरत्नाढ्यंकृत्स्नप्रेमामृताभिधं॥१०॥ नित्यंव्रजयनेतस्यस्रोत्रंतुष्टो
भवद्धरिः॥ जगामदर्शनंतस्यग्रामदग्न्यस्यभूपते॥११॥ चतुर्भुजोहरिर्यत्रसाक्षात्तरुस्मःकमलेक्षणः॥ किरी
टेनार्कवर्णेनकुंडलाभ्यांवराजितः॥१२॥ कौस्तुभोद्भासिनोरस्कः पीतवासाघनप्रभः॥ मुखंवादनपरः साक्षा
न्मोहनरूपधृक्॥ तंदृष्वासहसोत्थायजामदग्न्योमुदान्वितः॥ प्रणम्यदंडवद्भूमौतुष्टावप्रियनोविभुं॥१४॥ ॥
परशुरामउ०॥ नमोनमःकारणविग्रहायप्रपंनबालायसुरार्तिहारिणे॥ ब्रह्मेशविष्वेंद्रमुखस्तुनायनमोस्तु
नित्यंपरमेश्वराय॥१५॥ यंवेदवादैर्विविधप्रकारैर्निर्णेतुमीशानमुखानशक्ताः॥ नत्वामनिर्देश्यमजंपुराणं
मनंतमाद्यंभवमेस्यापरः॥१६॥ यस्तेकरीशेनिजयाछितप्रदाधत्तेतनुर्लोकविहाररक्षणे॥ नानाविधादेवमनु
ष्यतिर्यगपादःसुभृमेर्भरवारणाय॥१७॥ नत्वामदंभक्तजनानुरक्तंविरक्तमन्यंतमयोद्दशद्दिषु॥ स्वयंसमक्षं
व्यभिचारदुष्टचित्तास्वपिप्रेमनिबद्धमानसं॥१८॥ यंवैप्रपंनाअसुराःसुरानरास्तिर्यग्योनयोपि
हि॥ गताःस्वरूपंनिखिलंविहायतेदेदृश्यत्वार्थममत्वमाश्वरंतं॥१९॥ देवदेवंभक्ततामभगप्सितप्रदंनिरी
हंगुणवर्जितंच॥ अचिंत्यमव्यक्तमघौघनाशनंप्राप्तोस्मिनंप्रेमनिधानमंदरात्॥२०॥ तेयंत्रितापैर्विवि
धैःस्वदेहमन्येतुयदोर्विचेतयंतं॥ स्वप्नेपतिरूपमलोकमंविभोपश्यंतिनेवार्थनिबद्धवाग्नाः॥२१॥
येवेत्वदीयंचरणंभवाअमन्निर्विस्मचित्ताविधिवत्सरंति॥ नतेतिभक्त्याथसमर्चयंतिवैपरस्परंसंसदि

वर्णयंति॥२२॥ तेनैकत्नमोरुवपंकभेदनप्रसक्तचित्ताभवतोन्हिपत्रे॥तिरंतिचान्यानपितारयंतिभवौषधंनाममु
धानवेश॥२३॥अतःप्रभोकामनिबद्धचित्तोभवंतमार्यांविविधप्रयत्नैः॥आराधयेनाथभवानभित्तःकिंतेऽविज्ञा
प्यमिहास्तिलोके॥२४॥ ॥वसिष्ठउ०॥इत्येवंवज्रमदग्निंतुसक्तंतंप्रणतंपुरः॥उवाचागाधयावाचामोहयन्निवमा
यया॥२५॥श्रीकृष्णउ०॥हंतरामममभागसिद्धंतेकार्यमुत्तमं॥कवचस्यमवस्यापिप्रभेदास्यधारय॥२६॥ह
त्वातंकार्तवीर्यंहिराजानंदत्तमानसं॥साधयित्वापितुर्वैरंकुरुनक्षत्रियांमहीं॥२७॥ममचक्रावनारोहैकार्तवीर्यो
धरातले॥हतकार्योद्विजश्रेष्ठतंसमापयमानद॥२८॥अद्यप्रभृतिलोकेस्मिन्नशावशेनमेभवान्॥चरिष्यतिय
थाकालंकर्तादूतास्वयंप्रभुः॥२९॥चतुर्विंशेयुगेचत्मन्वेतार्यांरघुवंशज॥रामोनामभविष्यामिचतुर्थ्यंहिसना
तनः॥३०॥कौरव्यानंदजनकोराजादशरथादहं॥तदाकौशिकयज्ञेतुसाधयित्वासलक्षणः॥गमिष्यामिमहाभा
गजनकस्यपुरेमहत्॥तत्रेशचापंभंक्त्वापरिणीयविदेहजां॥३२॥तदाव्यास्यन्त्रयोध्यानेहरिष्येतेजउल्बणं॥
वसिष्ठउ०॥रुक्मएवंसमादिश्यजामदग्न्यंतपोनिधिं॥३३॥पश्यंतंतंदधेतत्रसमस्यसुमहात्मनः॥ ॥इतिश्री
ब्रह्मांडपुराणेमध्यमभागेभार्गवचरित्रे॥७७॥अध्यायः॥ ॥वसिष्ठउवाच॥अंतर्धानंगतेरुक्मेरामरुक्म
कमहाद्युतिः॥समुद्रिक्तमथात्मानंमेनेरुक्मानुभावतः॥१॥अरुतव्रणसंयुक्तःप्रदीप्ताग्निरिवज्वलन्॥समा
यातोभार्गवोसौपुरीमाहिष्मतींप्रति॥२॥यत्रयातहरापुण्यानर्मदासरितांवरा॥पुनातिदर्शनादेवप्राणिनः पा
पनोह्यपि॥पुराययत्रहरेणापिनिविष्टेनमहात्मना॥त्रिपुरस्यविनाशायरुतोयत्नोमहीपते॥४॥तत्राकंवर्ण्यते
पुण्यंरुद्राणांदेवरूपिणा॥सदृष्ट्वानर्मदांभूपभार्गवः कुलनंदनः॥नमश्चकारसंप्रीतःशत्रुसाधनतत्परः॥नमो
स्तुनर्मदेतुभ्यंहरदेहसमुद्भवे॥६॥क्षिप्रंनाशयशत्रून्मेवरदाभवशोभने॥इत्येवंसनमस्कृत्यनर्मदांपापनाशि
नीं॥हृतप्रस्थापयामासकार्तवीर्यार्जुनंप्रति॥हृतराज्ञालयावाच्यायद्दृष्टंवच्मितेनघ॥८॥नसंदेहस्तयाकार्यो
हृतः क्वापिनबध्यते॥यद्रुतंतुसमाश्रित्यजामदग्निर्मुनिंनृप॥९॥तिरस्तंकृतवान्मूढतत्पुत्रोयोद्धुमागतः॥ज्ञ॥

ग्रंनिर्गछमंदात्मनयुद्धंरामायदेहितत॥भार्गवंतंसमासाद्यगछल्लोकांतरंत्वरा॥इत्येवमुक्तराज्ञानंश्रुत्वातस्य
वचस्तथा॥शीघ्रमागछभद्रंतेविलंबोनेहशस्यते॥तेनैवमुक्तोदूतस्तुगतोहैहयभूपतिं॥१२॥रामोदृष्टंतत्सक
लंश्रावयामाससंसदि॥सराज्ञात्रेयभक्तस्तुमहाबलपराक्रमः॥१३॥चुक्रोधश्रुत्वावाच्यंतदूतराजमहावहन्
॥ ॥कार्तवीर्यउ०॥मयाभुजबलेनैवदत्तदत्तेममेदिनी॥१४॥क्षत्रियाप्रसह्यभूपालान्वधानायनिर्जरपुरं॥तद्भूलंम
पिवर्तेनयुद्धंह्यस्येतवार्थना॥१५॥इत्युक्त्वाविससर्जास्यदूतंहैहयभूपतिः॥सेनाध्यक्षंसमाहूयप्रोवाचवदतां
वर॥१६॥सज्जंकुरुमहाभागसैन्यंमेवीरसंमतः॥योत्स्यतेरामेणभृगुणाविलंबोमाभवत्विति॥१७॥एवमुक्तोमहा
वीरःसेनाध्यक्षःप्रतापवान्॥सैन्यंसज्जंविधायाशुचतुरंगंन्यवेदयत्॥१८॥सैन्यंसज्जंसमाकर्ण्यकार्तवी
र्योन्नृपोमुदा॥सुनोपनीतंस्वरथमारुरोहविशांपते॥१९॥तस्यराज्ञःसमंतातुसामंतामरुकेश्वराः॥अनेकाक्षौ
हिणीयुक्ताःपरिवार्योपतस्थिरे॥२०॥नगारशुंकोशस्त्रात्रहयस्यंदनयत्नपः॥असंख्याताःमहाराजसैन्येसा
गरसंनिभे॥२१॥दृश्यंतेतत्रभूपालानानावेशसमुद्भवाः॥महावीरामहाकायानानायुद्धविशारदाः॥२२
नानाशस्त्रास्त्रकुशलानानावाहनतान्नृपाः॥नानालंकारसंयुक्तामत्तदानविभूषिताः॥२३॥महामात्र
कृतोद्देशभानिनामाध्यनेकशः॥नानाजातिसमुत्पन्नाहयावपवनरंहसः॥२४॥प्लवंतोभांतिभूपालमाहि
भिःकृतनिश्चयाः॥स्यंदनानिसुदीर्घाणिज्वलनार्कयुतानिच॥२५॥चक्रनिर्घोषयुक्तानिप्रावृषेमेघोपमा
निच॥यद्रास्त्रपरमुराज्यंतेसद्रुचर्मधरान्नृप॥२६॥अहंपूर्वमहंपूर्वामित्यहंपूर्विकान्विता॥यद्रामश्चलितंसै
न्यंकार्तवीर्यार्जुनस्यवै॥तद्राप्रच्छादितंव्योमरजस्याचादृशोदृशा॥नानावाद्यनिर्घोषैर्हयानांहेषितेस्व
था॥२८॥गजानांबृंहितैराजन्व्याप्तंगगनमंडलं॥मार्गेदृशार्हराजेंद्रोविपरीतानिभूपते॥२९॥शकुनानिर
णेतस्यमृत्युरोत्पादकानिच॥मुक्तकेशांछिन्ननासांरुदंतीचादिवंवरां॥३०॥रुक्मवस्त्रपरीधानांवनितासद्द
र्शहृ॥कुचेलंपतितंभग्ननग्नंकाषायवाससं॥३१॥अंगहीनंदृष्ट्वासोनरेंद्रःखितमानसं॥गीर्धंध्वज्र

राकं शल्यं रिक्तकुंभं सरीसृपं॥ ३२॥ कार्पासं कङ्कपेलकंकवर्णं चालिखंउनं॥ सदक्षिणेश्वगात्रंच कुर्वंतंभैरवंरवं॥ ३३॥ रोगिणंपूतिसंचैव एवंचश्येनभल्लकैः॥ दृष्ट्वाविप्रययौयोद्धुं कालपाशगतोहगत॥ नर्मदोत्तरतीरस्थो ह्यरुतज्ञणसंयुतः॥ वटछायासमासीनोरामोवश्यदृपागतं॥ ३५॥ कार्तवीर्यंनृपवरं शतकोटिन्यषान्वितं॥ सदृष्ट्वा क्षोहिणीयुक्तं हृष्टोबभूवह॥ अद्यमेसिध्दिमायांतं कार्यवीरसमोहृतं॥ यदृच्छयागोचरंजातः कार्तवीर्योनृपाधमः॥ ३७॥ इत्येवमुक्त्वोत्थाय ध्रुत्वापरशुमायुधं॥ यज्ञंभर्तारंनाशयासिंहःक्रुद्धोयथातथा॥ ३८॥ दृष्ट्वास मुद्यतंरामंसेनिकानांवधायच॥ चकंवीरभटांसर्वान्यथारिवनरारिणं॥ ३९॥ सयत्रपत्रानिलंरूसंभग्नश्चिन्न पशेषेणयुतः॥ परश्वधंततस्तस्छिन्नभुजोरुकंधरानागाह्यासुरनरानिवेतुः॥ ४०॥ यथागजेंद्रोमदयुक्तसमं ततोनीलंवनमर्दयतिप्रधावन॥ तथापिरामोपिमनोनिलोज्ञाविमर्दयास्यसनपश्यसेनां॥ ४१॥ दृष्ट्वानमिथंप्र हरंतमोजसारामंरणेशस्त्रभृतांवरिष्ठं॥ उद्यम्यचापंमहदाहितोरयं सज्जंचकल्पाकिलमत्सराजः॥ ४२॥ आ रुष्यबाणानतलोग्यतेजसः समाकिरन्भार्गवमाससाद॥ दृष्ट्वातमायांतमथोमहात्मारामोगृहीत्वाधनुषंमहो ग्रं॥ ४३॥ वायव्यशस्त्रंविधुरेरयास्तुतोनिवारयन्मंगलबाणवर्षं॥ सचापिराजातिबलोमनस्वीससर्जरामापाशु पर्वतास्त्रं॥ ४४॥ नशंभतेनास्त्रबलंनदेखवायव्यमिद्धास्त्रविधानदक्षः॥ रामोपितत्पातिबलंविदित्वातंमत्स्यराजं विविधास्त्रपूगैः॥ ४५॥ क्रितमाजोप्रसभंमुमोचनारायणास्त्रंविधिमंत्रयुक्तं॥ नारायणास्त्रंभृगुणाप्रयुक्तं रामेणराजन्नरपतेर्वधाय॥ ४६॥ दिशस्तुसर्वाः सभृशंहतेजसाप्रज्ज्वलुर्मत्स्यपतिश्चकंपे॥ रामस्तुतस्याथ विलक्ष्यकंपंबाणैश्चतुर्भिर्निजघानवाहान्॥ ४७॥ शरेणचैकेनध्वजंमहात्माचिछेदचापंचशरद्वयेन॥ बा णेनचैकेनप्रसह्यसारथिंनिपात्यभूमौरथमार्दपात्रिभिः॥ त्यक्तारथंभूमिगतंचमंगलंपुरस्वधेनाभुजघा नमूर्धनि॥ एभिन्नवीर्योरुधिरंवमन्मुहुर्मुहुर्मंछमवाप्यथममाचरक्षणात्॥ ४९॥ तत्सैन्यमस्त्रेणचसंप्रदग्ध विनाशमायादथभस्मसात्क्षणात्॥ ५०॥ तस्मिन्निपतितेराज्ञायुद्धायाश्चविशारदः॥ राजेंद्रान्प्रेरयामास

कार्तवीर्योमहाबलः॥ ५१॥ हृहृहूहूःसोमदत्तोविदर्भोपिथतमेश्वरः॥ निषधाधिपतिश्चैवमगधाधिपतिस्तथा ॥ ५२॥ आययुःसमरेयोद्धुं भार्गवेंद्रेणभूपते॥ वर्षंतशरजालानिनानायुद्धविशारदाः॥ वीराभिमानिनःस र्वेदृढयस्त्रायतास्त्रा॥ पिनाकहस्तःसभृगुःज्वलद्ग्निशिखोपमः॥ ५५॥ क्षिप्तेनागपाशंचअभिमंत्रशरोत्त मं॥ तदस्त्रंभार्गवेंद्रेणक्षिप्तेसंग्राममूर्धनि॥ चकर्तगारुडास्त्रेणसोमदत्तोमहाबलः॥ ततःक्रुधोमहाभागोराम मस्त्रंविदारुणं॥ ५६॥ रुद्रदत्तेनभृत्येनसोमदत्तंजघानह॥ हृहूहूंस्त्वगदयाविदर्भमाक्षिनातथा॥ ५७॥ मोथि तंमुद्गरेणैवशस्त्रानिनिषधाधिपं॥ मागधेचरणाघातैर्वशस्त्रजालेनसेनिकान्॥ ५८॥ निहत्यानिखिलांसेनांस हाराग्निसमोरणे॥ दृष्ट्वाचकार्तवीर्यंचन्नामदग्न्योमहाबलः॥ दृष्ट्वातंयोधमायांतंराजानोन्यंमहारथाः॥ का र्तवीर्यविधानज्ञाः एष्टेनृत्वाचहैहयं॥ ६०॥ रामेणयुयुधंश्चैवदुर्जयंतश्चसोहृदं॥ कन्याकुब्जाश्चनृपतयो राष्ट्रावंतयस्तथा॥ ६२॥ चक्रुश्चशरजालानिरामस्यचसमंततः॥ शरजालंहतंतेषांरामःसंग्राममूर्धनि॥ ६३ नमाद्दश्यतराजेंद्रतध्वसत्यहतव्रणः॥ मस्मारामचरितंयदुक्तंहरिणनवै॥ कुशलंभार्गवेंद्रस्य याचमानोहरिं हरं॥ एतस्मिन्नेवकालेतु रामःशस्त्रास्त्रकोविदः॥ ६५॥ विधूयशरजालानिवायव्यास्त्रेणमंत्रवित्॥ उद्यतं घ्नद्रणेकांक्षीनीहारादिवभास्करः॥ ६५॥ त्रिरात्रंसमरेरामस्तैःसार्धंययुधेबली॥ द्वादशाक्षौहिणीस्तत्रोच्चि दलघुविक्रमः॥ ६६॥ रंभास्तंभवनंयद्वत्परश्वधवरायुधः॥ सर्वास्तान्भूपवर्गांश्चतदीयाश्चमहाचमूः॥ दृष्ट्वाविनिहतांस्तेनरामेणसुमहात्मनः॥ आजगाममहावीर्यःसकंद्रःसूर्यवंरराजः॥ ६८॥ लक्ष्यराजन्यसं युक्तःसप्ताक्षौहिणिसंयुतः॥ तत्रानेकंमहावीरागर्जंतस्तोयदाइव॥ ६९॥ कंपयंतोभुवंराजन्युयुधुर्भार्गवेणच॥ तैःप्रयुक्तानिशस्त्राणिमहास्त्राणिचभूपते॥ ७०॥ क्षणेननाशयामासभार्गवेंद्रप्रतापवान्॥ गृहीत्वा परशुंदृप्तंकालांतकयमोपमं॥ कालयन्सकलंसेनांचिछेदभृगुनंदनः॥ कर्षकस्यथाक्षेत्रेपक्वधान्यंतथा तृणं॥ ७२॥ निःशेषपतितंराज्ञेणतथारामेणतत्कृतं॥ लक्ष्यराजन्यसैन्यंतदृष्ट्वारामेणदीरितं॥ ७३॥ सु

चंद्रः पृथिवीपालोयुयुधे संगरेनघ॥ तावुभौतत्र संक्रुद्धौ नानाशस्त्रास्त्रकोविदौ॥ ६४॥ युयुधातेमहावीर्यौ
नीलोत्पलसमप्रभौ॥ रामोस्मैयानि शस्त्राणिचिक्षेपास्त्राणिचाविदत्॥ ६५॥ तानिसर्वाणिचिच्छेदसुचंद्रोयुद्धपं
डितः॥ ततःक्रुद्धोरणेरामःसुचंद्रपृथिवीश्वरं॥ ६६॥ कृतप्रतिकृताभिज्ञंज्ञातोपस्त्र्यंबकार्यथ॥ नारायणास्त्रवि
न्यासेसंदधेस्वनिशातितं॥ ६७॥ तदस्त्रंद्युतसूर्याभंदृष्ट्वासंरामेणधीमता॥ दृष्ट्वातीर्यरथान्सद्यःसुचंद्रःप्रणनाम
ह॥ सर्वास्त्रभृज्जयंतेनचापिनारायणाविनिर्मितं॥ तमेतंप्रणतंत्यक्त्वापपौनारायणांतकं॥ ६९॥ विस्मितोत दारामः
समेरुशृंगसन्निभः॥ दृष्ट्वाव्यर्थंमहास्त्रंतद्रूपंचास्यंकिलोक्यच॥ ७०॥ रामःशक्तिंचमुसलंतोमरंपट्टिशंतथा॥
गदांचपरशुंकोपाच्चिक्षेपनरपमूर्धनि॥ ७१॥ तयाहतानिसर्वाणिसुचंद्रोलीलयैवहि॥ चिक्षेपशक्तिंचस्फुलन्नरा
मोन्मूलपतयेयशः॥ ७२॥ बभूवपुष्पमालाचतच्छूलंनृपतेर्गले॥ दृष्ट्वार्तिंचपरांरुद्रस्यभद्रकालीजगत्प्रसूः॥ ७३॥ वदं
तींमुंडमालांचविकटाट्टाट्टभैरवं॥ सिंहस्कंधांत्रिनेत्रांचत्रिशूलवरधारिणीं॥ ७४॥ दृष्ट्वाविद्यांमहास्त्रास्त्रंनमस्कृ
त्यसमेऽतत॥ ॥रामउ॥ नमोस्तुतेशंकरवल्लभायेजगत्सवित्र्येसमलंकृतायै॥ ७५॥नानाविभूषाभिरिभारि
गायेप्रपंनपालायकृतादमायै॥ दक्षप्रसूत्यैधिमवद्भवायैमहेश्वरार्धांगसमाश्रितायै॥ ७६॥ कालेपकालानां
थकालधरायैभक्तप्रियायैभुवनाधिपायै॥ नाराभिधाद्योद्गितत्परायैगणेश्वरराधितपादुकायै॥ ७७॥
परात्परायैपरमेष्ठिदायैतापत्रयोन्मूलनचिंतनायै॥ जगद्धितायारुतपुरंतपायैबालाद्रिकायैत्रिपुराधिपायै॥
समस्तविद्यासुविलासदायैजगज्जनन्यैनिहितोद्धितायै॥ वकाननायैबहुसौख्यदायैविश्वस्तनानासुरदानवा
यै॥ ७९॥ वराभयालंकृतदोर्लतायैसमस्तगीर्वाणनमस्कृतायै॥ पीतांबरायैपवनाशुगायैशुभप्रदायैत्रिव
संस्कृतायै॥ ८०॥ नागारिगायैनवखंडपायैनीलालकाभांगलसत्प्रभायै॥ लघुक्रमायैलसिताभिधायैले
खाधिपायैलवणाकरायै॥ ८१॥ रक्तप्रभायैरुचिरांबरायैनमोनमस्तेपरतःपुरस्तात्॥ पार्श्वाधरोर्ध्वंचनमो
नमस्तेसदाचसर्वत्रनमोनमस्ते॥ ८२॥ स्खलंतंपिप्रहायेप्रसीददेवित्थंमयप्रतिज्ञापुराकृतांपालयभद्रकालि॥

तमेवमुक्त्वाचपितात्वमेवजगन्मयस्यापिनमोनमस्ते॥ ८३॥ ॥वासिष्ठउ॥ एवंस्तुतातदादेवीभद्रकालीतपस्विनी॥ उ
वाचभार्गवंप्रीतावरदाननृतोत्सवा॥ ८४॥ ॥भद्रकाल्युवाच॥ वत्सरामममभागप्रीतोस्मितवसांप्रतं॥ वरंवर
यमत्तोयस्त्वयाचाभ्यर्थितोहृदि॥ ८५॥ रामउ॥ मातर्यदिवरोदेयस्त्वयामेभक्तवत्सले॥ तत्सुचंद्रजयेयुद्धे त
वानुग्रहभाजनं॥ ८६॥ इतोभिहितंदेविकुरुप्रीतेनचेतसे॥ येनकेनाप्युपायेनजगन्मातर्नमोस्तुते॥ ८७॥ ॥
भद्रकाल्युवाच॥ आग्नेयास्त्रेणराजेंद्रसुचंद्रेनयमद्रुहं॥ ममातिप्रियमद्येवपार्थसोमेभवत्वय॥ ८८॥ वासिष्ठउ॥
इत्युक्तमाकर्ण्यसभार्गवेंद्रोदेव्याप्रियंकर्तमथोद्यतोभूत्॥ प्राणांनियम्याचमनंचकृत्वासुचंद्रमादृश्यचतत्समा
दधे॥ ८९॥ अस्त्रेप्रयुक्तेनृपतेर्वधायरामेणराजन्प्रसभेतदद्यात्॥ दृष्ट्वाचपुर्भूतमयंतदीयंननायलोकंपर
देवतायाः॥ ९०॥ ततस्तरामेणकृतप्रणामासाभद्रकालीजगदादिकर्त्री॥ अंतर्दधेभूस्थजामदग्न्यस्तसुथो
रणेभूपवधाभिकांक्षी॥ ९१॥ ॥इतिश्रीब्रह्मांडपुराणेमध्यभागेभार्गवचरित्रे ७९॥ अध्यायः
८० ॥ वासिष्ठउ॥ राजेंद्राणांशिरोमणेतत्रपुत्रःपुष्करोक्षरुतरामंयोद्धुमथागतः॥ १॥ सरथस्तोम
हावीर्यःसर्वशस्त्रास्त्रकोविदः॥ अभिवाक्ष्यरणेत्युग्रंरामकालांतकोपमं॥ २॥ चकारज्यारजालेचभार्गवेंद्रस्यस
र्वतः॥ मुहूर्तंजामदग्न्यापिबाणैःसंछादितोभवत्॥ ३॥ ततोनक्रम्यसहसाभार्गवेंद्रोमहाबलः॥ ज्यारवंधा
न्महाराजसमुद्रेक्षतसर्वतः॥ ४॥ दृष्ट्वातंपुष्करक्षंतुसुचंद्रतनयंतदा॥ क्रोधमाहारयामासदिधक्षन्निवपावक
ः॥ सक्रोधेनसमाविष्टोवारुणंममवासृजत्॥ ततोमेघाःसमुत्पेनागर्जंतोभैरवान्रवान्॥ ६॥ वरुषुर्जलधा
राभिःप्लावयंतोधरांनृप॥ पुष्करक्षोमहावीर्योमाहेयास्त्रमवासृजत्॥ ७॥ तेनतेदुर्दिनंनीताःसद्यएव
बलाहकाः॥ अथरामोभद्रकाल्यैप्राह्लंतत्राभिसंदधे॥ ८॥ पुष्करक्षोपितेनैवविचकर्षमहाचलः॥ प्रा
ह्लस्तोप्याहतंदृष्ट्वादंशहतावोरगः॥ ९॥ घोरंपरशुमादायनिःश्वसंस्तममधावत्॥ रामस्यधावनस्तत्रपु
ष्करक्षोधनुर्धरः॥ १०॥ संदधेपंचविंशत्यानतीक्ष्णास्यानुरगानिव॥ एकैकेनचबाणेनहृदिनीर्भेभुजद्वये॥

शिखायांचक्रमाविध्यातस्तंभग्नामातुरं॥ सचैवंपातितोरामः पुष्कराक्षेण संयुगे॥१२॥ क्षणंस्थित्वाभृगोर्धा
वन्यरथंमूर्ध्नियातयत॥ शिखामारभ्यपाणिनंपुष्कराक्षंदिधाकरोत्॥१३॥पतितेसकलेभूमौतत्कालंपश्यतां
नृणां॥ आश्चर्यंसुमहज्जातदिविचैवदिवौकसां॥१४॥विप्रार्यरामसंक्रुधानपुष्कराक्षेमहाबले॥ तस्मैत्यमहतं
क्रुद्धःपावकोविपिनंयथा॥१५॥पपातरथावतिभार्गवेंद्रमतोनिरीक्ष्याःप्रहरन्यरश्वधं॥ ततस्ततोवाजिरथे
नमानवाग्निकृतगात्राःशतशोनिपेतुः॥१६॥रामेणतत्रातिबलेनसंगरेनिहन्यमानास्वपरश्वधेन॥ हतात
मातस्त्विनिजल्पमानाभस्मीबभूवुःमुविचूर्णितारत्नदा॥१७॥मुहूर्तमात्रेणचभार्गवेणतत्पुष्कराक्षस्यबलंसम
ग्रं॥अनेकराजन्यकुलंहतेश्वरंहतंतथाक्षौहिणकंभशातुरं॥१८॥पतितेपुष्कराक्षेनुकार्तवीर्यार्जुनःस्वयं॥
आजगाममहावीर्यःसुवर्णरथमास्थितः॥१९॥नानाशस्त्रसमाकीर्णनानारत्नपरिच्छदं॥दृष्ट्वानल्वप्रमाणंच
शतवाजियुतंनृपः॥२०॥युयोतोदुसदृक्षेणनानायुद्धधरेणच॥ क्षणोस्वर्कोकुमारोस्यनरेहतेसुकृतंयथा॥
२१॥पुत्रास्तस्यमहावीर्याःशतयुद्धविशारदाः॥ सेनाःसंप्रहृतंतत्रुसंग्रामेपितुराज्ञया॥२२॥कार्तवीर्यस्तुबल
वान्रामंदृष्ट्वारणाजिरे॥ कालांतकयमाप्रख्यंयोद्धुंसमुपचक्रमे॥२३॥दृक्षेपंचशतंबाणानवामेपंचशतं
धनुः॥ जघ्नेदृभार्गवेंद्रस्यसमरेजेतुमुद्यतः॥ बाणवर्षंचकारोथरामस्योपरिभूपतेः॥ यथाबलाहकोवी
रपर्वतोपरिवर्षति॥२५॥बाणवर्षेणसेनातोसन्हतोभृगुनंदनः॥ जघ्नेदृस्वधनुर्दृव्यंबाणवर्षंतथाकरो
त्॥२६॥तावुभौरणसंदृक्षौतदाभार्गवदृक्षयोः॥ चक्रतुर्युद्धमतुलंतुमुलंलोमहर्षणं॥ ब्रह्मास्त्रंचसुभृशा
लःसंदधेरणमूर्धनि॥ बोधयभार्गवेंद्रस्यसर्वशस्त्रास्त्रधृग्बली॥२८॥ रामोपिवायुपस्पृश्यब्राह्मंयन्त्रा
ह्वायसंदधे॥ ततोव्योम्निमहासक्रेदृधाप्यस्त्रेणनराधिप॥२९॥ दृष्टानेजगत्त्रांतेतेनसाज्वलनार्कवत्॥
त्रयोलोकाःसपातालादृष्ट्वातन्महदद्भुतं॥३०॥ज्वलदस्त्रयुगंतत्रामेनिरेसोपसंयमं॥ रामस्तदावीक्ष्यजगं
त्प्रणाशंजगतांनिवासोक्रमथास्मरत्तदा॥ रक्षाविधौयादृमथास्यसंयमोनिवारणीयःपरमास्त्रधारिणां॥३१

इतिश्रवस्यप्रभरग्रतेजानेत्रद्वयेनाथतदस्त्रयुग्मं॥ पीतानिरामंजगदाकुलंप्रतक्षेक्षणंध्यानगतोमहात्मा॥३२
ध्यानप्रभावेणतनस्तुतस्यब्रह्मास्त्रयुग्मंविगतप्रभावं॥ पपातभूमौसहसाथतक्षणंसर्वेजगन्त्रासमुपाजगाम
॥३३॥ सज्ञामदत्त्वामहतांमहीयानस्तुतश्चापालयतांनृणां॥ विभुस्तथापीहनिजंप्रभावंगोपायितुंलोकविधिंच
कार॥ धनुर्धरःशूरतमःसहस्रानसदग्रणीःसंसदितथ्यवक्ता॥ कुलाकुलेषुकृतप्रश्रयस्त्रोविद्याकृशास्त्रेषुबुधो
विधिज्ञः॥३५॥ एवंस्तुतोकेप्रथयन्सभावंसर्वाणिरक्षांसिकरोमिनित्यं॥ सर्वेतुलोकाविदितास्तुतेनरामेणराजन्यव
धूरतेन॥३६॥एवंसरामःप्रथितप्रभावःप्रशामयित्वातुतदस्त्रयुग्मं॥पुनःप्रहर्तोनधनंप्रकर्तुंरणांगणेदृक्षयु
वेंद्रकेतोः॥३७॥तूणीस्ततःपत्रियुगंगृहीत्वापुंखेनिधायाथधनुर्व्यकाषीत्॥प्राकृष्यकर्णंनृपकर्णयुग्मंचकर्तचूड़ा
मणिदृर्तकामः॥३८॥सहस्रकर्णोन्नृपतिर्महात्माविनिर्जिताशेषजगत्प्रवीरः॥ मैनेनिजंवीर्यमिहप्रणष्टंरामेणः
भृमीत्रानिरस्तात्मा॥३९॥क्षणंधराधीश्रुतनुर्विवर्णागतानुभावान्नृपतेर्बभूव॥ लेख्येवसञ्चित्रकर्मयुक्ताः
सुदीनचित्तस्यविलक्ष्यतेंग॥४०॥ ततःसराजामनजवीर्यवैभवंसमस्तलोकाधिकृतंप्रयातं॥विचिंतिपोलक्ष्यः
जयादिलक्ष्मंशोचन्निवासीत्सज्ञयाभिकांक्षी॥४१॥ दृष्ट्वोपमन्मौलितलोचनंनरेंद्रनंदनमाद्यकुलप्रदीपं॥य
स्यःप्रभावानुगृहीतओजसानिश्चक्रारात्रिलोकपालकान्॥४२॥ यदास्यदृद्वेषमहानुभावोदत्तप्रयातोनहिदृष्टनंतदा॥ खिन्नोतिमात्रधरणीपतितस्तदापुनःपुनर्ध्यानपथंजगाम॥ संध्यायमानोपितचाजगामदृक्षो
मनोगोचरमस्यराजन्॥ तपस्विनोदंतनमस्यसाधोरतागसोदुष्कृतिकारिणोविभुः॥४४॥एवंयदावेत्तन
योमहात्मादृष्टोनचध्यानपथेनरेण॥ तदातिदुःखेनविदूयमानःशोकेनमोहेनयतोबभूव॥४५॥तेशो
कमग्नंनृपतिंमहात्मारामोजगादाकिमुचित्तदृर्शा॥ माशोकेभावंनृपतेप्रयाहिनेवानुशोचंतिमहानुभा
वाः॥४६॥ यस्तेवरायाभवमादिसर्गेसएवचादृतवसादनाय॥ समागतस्तंभवधीरचित्तसंग्रामकालेनवि
षादचर्चा॥४७॥ सर्वेदिलोकाःस्वकृतंभुनक्तिशुभाशुभेदैवकृतेविपाके॥ अन्योन्यकोप्यस्यशुभाशुभस्यवि

पर्थयं कर्तुमलंनरेशः॥ ४८॥ यन्मेकृपुण्यंबहुबह्वजन्मसंचितंतेनेहदत्तस्यवराहृयाचे॥ ज्ञातोभवानयदुकुलस्य
कृत्स्नंप्रभुंस्वत्वमिहार्तितस्य॥ ४९॥ गुरुर्विमत्वापकृतस्त्वयामेयत्तत्तः कर्णनिकृंतनंते॥ कृतंमयापश्यदृतंमो
ज्ञमाचूरामणिंमामपहृत्यनेयशः॥ ५०॥ इत्येवमुक्त्वासभृगुर्महात्मानियोज्यबाणंचविरुष्यचापं॥ चिक्षेपरा
मंतुलयाचनिघ्नंरामंमुपाजगाम॥ ५१॥ तद्वीक्ष्यकर्मास्यमुनेः कृतस्यसचार्जुनोदूरयचंद्रार्धतीं
॥ समुद्यतोभूत्पुनरप्युदायुधस्तंस्तुमाज्ञोद्विजमान्यशत्रुं॥ ५२॥ शूलऋष्टिगदाचक्रखड्गपट्टीशतोमरैः॥ ना
नाप्रहरणैश्चान्यैराजघानद्विजन्मनं॥ सरामोत्साधवेनैवसंप्रक्षिप्तान्यनेनच॥ शूलादीनिचकर्तांशुमध्यएवनिजा
शुगैः॥ ५४॥ सराजाशायुधस्त्यक्तसर्वास्त्रोग्रेयमुत्तमं॥ अस्त्रंरामोवारुणेनशमयंमाससत्वरं॥ ५५॥ गांधर्वोविद
धेराजावायव्येनाहनद्विभुं॥ नानास्त्रंगारुडेनापिरामश्चिच्छेदभूपते॥ दत्तेनदत्तंयच्छूलंभव्यर्थंमंत्रपूर्वकं॥
जघानरामंरेराजाभार्गवस्यवधायच॥ ५७॥ तच्छूलेनप्रहारेणव्यथितोभार्गवस्तदा॥ मूर्छामवापराजेंद्रपश्चा
त्तत्वद्गरिंस्मरन्॥ ५८॥ पतितेभार्गवेतत्रसर्वेदेवाभयाकुलाः॥ समाजग्मुःपुरस्कृत्यब्रह्मविष्णुमहेश्वरान्॥ भृ
गुंकरुणमहात्मानीसाक्षान्मृत्युंजयःप्रभुः॥ भार्गवंजीवयामाससजीवन्यासविद्यया॥ ६०॥ रामस्तुचेतनांप्रा
प्यंददर्शपुरतःस्थितान्॥ प्रणनामचरामेंद्रभक्त्याब्रह्मादिकांस्तुतान्॥ ६१॥ तेस्तुताभार्गवेंद्रेणसद्योदर्शा
नमागताः॥ सरामोवायुपस्पृश्यजजापकवचंततः॥ ६२॥ उत्थितश्चसंरब्धोनिर्दहन्निवचक्षुषा॥ स्मृत्वापा
शुपतंचास्त्रंजघानदत्तंसभार्गवः॥ सघमासंदृतवारंतंकार्तवीर्यंमहाबलं॥ सराजादत्तभल्लुचिस्रोश्चकं
सुदर्शनं॥ ६४॥ प्रविशोभस्मसज्जातंतन्नारीरंस्याद्भुतंदृश॥ ॥ इतिश्रीब्रह्मांडपुराणेमध्यमभागेभार्गवच
रितेकार्तवीर्यवधः८० ध्यायः॥ ७ वसिष्ठउ०॥ दृष्ट्वापितुर्वधंघोरंतत्पुत्रास्तेभृतंतरा॥ वारयाञ्च
रमयुग्रंभार्गवंस्वबलैःपृथक्॥ १॥ एकैकाक्षौहिणीयुक्तःसर्वेतेयुद्धदुर्मदाः॥ संग्रामंतुमुलंचक्रुःसंरब्ध
स्तुपितुर्वधात्॥ २॥ रामस्तुदृष्ट्वातत्पुत्राश्चरानरणविशारदान्॥ परस्वधंसमादायययुधेतेश्वसागरे॥ ३॥

तांसेनांभगवान्रामः शताक्षौहिणिसंमितां॥ निजघानत्वरायुक्तोमुहूर्तेठ्यमात्रतः॥ ४॥ निःशेषितंस्वसैन्यंतु
क्रुद्धारेणेबलीत्कया॥ दृष्ट्वारामेणतेसर्वेययुधुर्वीर्यशंसनाः॥ ५॥ नानाविधानिरूप्याणिप्रहरंतोमहौजसः
॥ परितोमंडलंचक्रुर्भार्गवस्यमहात्मनः॥ अथरामोपिबलवांस्तेषांमंडलमध्यगः॥ विरेजेभगवान्साक्षा
द्यथानाभिस्तचक्रगः॥ ७॥ तद्युद्धंबालोवीरराजरामशतंपुनस्तेपरितोभ्रमंतः॥ रेजुश्चगोपीगणमध्यसं
स्थःकृष्णोयथाताःपरितोभ्रमंत्यः॥ ८॥ तदातुसर्वेबृहिणप्रधानाःसमागताःस्वस्वविमानसंस्थाः॥ स मा
क्रिरंनंस्वमाल्यवर्षैःसमंततोरामसमीनवीर्यं॥ ९॥ यःशूलपाताद्दुरभिष्टतध्वनिर्दुष्कर्णभीदेवमस्त्रजाः
सर्वे॥ तापत्रिकृत्येचसरक्षतानिभांतापत्रयघ्नंनसदंतपोताः॥ १०॥ केदंतशस्त्रैःक्षतविग्रहांगागायंतियद्वा
त्रिकृगीतविद्या॥ एवंप्रहरंतंनरपंयुद्धमंडलेपश्यंतिरेवाभ्रगाविस्मिताश्चाः॥ ११॥ ततस्तुरामोवनिपालपुत्रान्
क्षिप्रंसुराजोवविधास्त्रपूगैः॥ अथकृत्तकारातिबलास्तुमंदाद्विछेदपंक्तिंप्रभुरातचापः॥ १२॥ एकैकमस्त्रान्वि
जघान्विराजनशातंतदर्पंचततःपलायिताः॥ शूरोरुषास्योरुषसूरसेनोजयध्वजाषीविभिन्नधैर्याः॥ महाभ
यानाथपरासचेत्ताद्विमाद्रिपादांतरकाननंच॥ अथगास्तेसुपरीत्यवोत्थानकोपिकासिद्दृढशेभशार्तः॥ १४॥
रामोपिहत्वानृपचक्रमाजौराज्ञःसमुपार्थमुपागतंच॥ समन्वितोसावकृतव्रणेनभ्रात्रोमुदागत्यचनर्मदार्या॥
१५॥ स्नात्वानित्यान्निवृत्तोसंपूज्यरुषंभध्वजं॥ प्रतस्थेदक्षुमुर्वीशाज्ञावैकेलासवासिनं॥ १६॥ गुरुंपत्नीमुमांवा
पिसुस्कंदविनायकौ॥ मनोपायोमहात्मासावकृतव्रणसंयुतः॥ कृतकार्योमुदायुक्तैकेलासमाप्यतत्क्षणं॥ य
द्दूर्शतत्रनगरीमहतीमलकाभिधां॥ नानामणिगणाकीर्णभवनैरुपशोभितां॥ नानारूपधरैर्यक्षैःशोभि
तांचित्रभूषणैः॥ १९॥ नानावृक्षसमाकीर्णवनैश्चोपवनैर्युतां॥ हार्दिकाभिःसदीर्घाभिस्तडागैश्चोपशोभि
तां॥ २०॥ सर्वतोप्याकुलांबाल्यांसीतपालकनेरया॥ तत्ररेवांगनास्नानमुक्तकुंकुमपिंजरं॥ तृषाविराद्वितांः
श्वाभःपिबंतिकरणोमुदा॥ यत्रसंगीतसंनादाश्रूयंतेतत्रतत्रहि॥ २२॥ गंधर्वैरप्सरोभिश्चसततंसहकारिता॥

तांदृष्ट्वाभार्गवोराजन्भृकुटीकरवस्तयुतः॥२३॥ ययौतदूर्ध्वंशिखरंयत्रसंवपरंस्थितः॥ ततोददर्शगंडैस्निग्धच्छा
यंमहावटं॥ तस्याधस्ताधगवामः मुसेव्यःसिद्धसंयुतः॥ ददर्शतत्रप्राकारंशतयोजनमंडलं॥२५॥ नानारत्ना
न्वितंरम्यंचतुर्द्वारंगसंयुतं॥ नद्दीश्वरंमहाकालंरक्षाक्षोविकटोदरं॥२६॥ पिंगलाक्षंविशालाक्षंविरूपाक्षंघ
टोदरं॥ मंदारेभरवंवाणंरुद्रभैरवमेवच॥२७॥ वीरकंवीरभद्रंचचंडभृंगिरिटिंमुखं॥ सिद्धद्वातथरद्वांश्चवि
द्याधरमहोरगान्॥२८॥ भूतप्रेतपिशाचांश्चयक्षाद्यानब्रह्मराक्षसान॥ वेतालान्दानवेंद्रांश्चयोगीद्राश्चजराधा
रान्॥२९॥ यक्षांकिंपुरुषांश्चैवत्रशक्तिनोयोगिनीतथा॥ दृष्ट्वातेद्योतयातत्रविघ्नेशनर्मदान्वितः॥३०॥ ददर्शतत्रभु
वनेगंदतांशिवमंदिरं॥ चतुर्थाईनवोत्तीर्णतत्रशागद्वारसंस्थितो॥ दृष्ट्वावामेकार्तिकेयंदक्षेचविनायकं॥ ननाम
भार्गवस्तोद्दशिवतुल्यपराक्रमं॥३२॥ पार्श्वद्वयवरास्तत्रक्षेत्रपालाश्चसंस्थिताः॥ रत्नसिंहासनस्थाश्चरत्नभूषण
भूषिताः॥33॥ भार्गवंप्रविशंतंतुदृष्ट्वाशिवमंदिरं॥ विनायकोमहागजःक्षणंतिष्ठत्युवाचह॥३४॥ निद्रितो
ऽसमयायुक्तोमहादेवोधुनातिच॥ ईश्वरस्तोत्रहीत्वाहंमंत्रागत्यक्षणंतरे॥३५॥ त्वयासार्धंप्रवक्ष्यामिभ्रातस्ति
ष्ठानसांप्रतं॥ विनायकवचश्चैवश्रुत्वाभार्गवमंदेन॥३६॥ प्रवक्तुमुपचक्रामगणेशंवरयान्वितः॥ ॥रामउ०
गत्वाह्यनःपुरंभ्रातःप्रणम्यजगदीश्वरं॥३७॥ पार्वतीचकरंगसंध्यायास्यामिनिजमंदिरं॥ कार्तवीर्यःमुचंद्र
श्चसपुत्रबलबांधवः॥ ३८॥ अन्येसप्तशताभूपाःकांबोजावप्लवाःशकाः॥ कन्यकुलाःकालशाःमत्स्यावंगा
मगधाबलाः॥ ३९॥ निर्भूताःसमरेसर्वेमयाशंभुप्रसादतः॥ तमिमंप्रणिपत्यैवयास्यामिस्वगृहंप्रति॥ ४०॥ इत्यु
क्काभार्गवस्तत्रतस्थौगणपतेःपुरः॥ प्रोवाचमधुरंवाक्यंभार्गवंसगणाधिपः॥ ४१॥ ॥विनायकउ० क्षणंति
ष्ठमहाभागदर्शनंतेभविष्यति॥ अद्यविघ्नेश्वरोभ्रातर्भवान्यासहवर्तते॥ ४२॥ स्त्रीपुंसोयुक्तयोसातमेदू
रासनसंस्थयोः॥ करोतिसुखभंगायानरकंसद्यजेध्रुवं॥ विशेषतस्तुचित्तरंगुरुवाभूपतिद्विज॥ रहस्यंसमुपा
सानेतपस्यादतिनिश्चय॥ ४४॥ कामतोकामतोवापिपश्येद्यः सुरतोत्सवं॥ स्त्रीविहीनेभवेत्तस्यध्रुवंसप्तसु

GURUDAS DAS MEMORIAL

जन्मसु॥ ४५॥ श्रोणिंवक्षस्थलंवक्त्रंयःपश्यतिपरस्त्रियाः॥ सानुर्वापिभगिन्योवादुहितुःसभराधमः॥ ४६॥
भार्गवउ०॥ अहोश्रुतमहत्पूर्वंकिंचनंतवचक्रतः॥ भ्रात्याविनिर्गतंयापिह्यस्यार्थमथचोद्यतं॥ ४७॥ कामिनां
सविकाराणांमनस्तस्मिन्निदर्शने॥ निर्विकारस्यचशिशोर्मदोषःकश्चिदेवहि॥ ४८॥ यास्यास्यंतःपुरंभ्रातस्तवकिं
लिखाम्यहं॥ यथादृष्टंकरिष्यामितत्रयत्नमथोचितं॥ ४९॥ तत्रैवमाताताीताश्चतथानामानिरूपिता॥ जगतांपि
तरोनोचपार्वतीपरमेश्वरौ॥ ५०॥ इत्युक्त्वाभार्गवोराजननत्वागंतुंसमुद्यतः॥ विनायकस्तदोक्षायवारयामाससत्व
रं॥ वाग्युद्धंचतयोरासीन्मिथोदूषितिवकर्षणं॥ दृष्ट्वास्फुरत्तसंभ्रांतोबोधयामासतोतदा॥ ५२॥ आदृभ्यां
दूरमभ्रुत्वरथागत्वारितोतथा॥ अथक्रुद्धोगणेशायःभार्गवःपरवीरहा॥ ५३॥ परशुंसमाधायसंप्र
हर्तुंसमुद्यतः॥ तंदृष्ट्वासगजाननाभृगुवरंक्रोधानक्षिपंतंस्वगस्यान्नाथंपरशुंतदानिजकरेणादृत्यवेगेन
तु॥ भूलोकंसकलंसकलंभुवःस्वरपितस्योर्ध्वमहर्जनंलोकंचापितपाथससमपरंवेकुंठमथानयत॥ ५५॥
तस्योर्ध्वंचविदर्शयनभृगुवरंगोलोकमीशन्मनोनिःपात्याधरलोकसमकमयंस्यंदर्शयामासच॥ इत्थंत्या
थततोदृगर्भसलिलेप्रक्षिप्तमात्रंतगभीतंप्राणपरीप्सुमानयदथोतत्रैवयत्नाक्षितः॥ ५५॥ ॥७॥ इतिश्री
ब्रह्मांडपुराणेमध्यमभागेभार्गवचरिते॥८२ अध्यायः॥ ॥ वसिष्ठउ०॥ एवंसंभाषितोरामोगणाधी
शेनभूपते॥ हर्षशोकसमाविष्टोविचित्यात्मपराभवं॥१॥ गणेशंचाभितोवाक्यानिर्विकारमचक्षितं॥ क्रोधा
विष्टोभ्रुवोभृत्वाप्राक्षिपत्त्वपरश्वधं॥२॥ गणेशस्तमिवाज्ञायाथपित्राद्तंपरश्वधं॥ अमोघंकर्तुकामस्तुधामे
तदथानगृहीतं॥3॥ मतुंडेनःकुठारेणाविछिन्नोभूरितोपतत॥ भुविशोणितसंदिग्धोवज्राहतइवाचलः॥ ४॥
दंतपातेनविश्वस्तासार्धद्वीपपराधरा॥ चकंपेपृथिवीपालालोकास्त्रासमुपागताः॥५॥ हाहाकारोमहानासी
दृषीणांदिविपश्यतां॥ कार्तिकेयाश्रयत्तत्रचक्रुश्चभृशमातुरः॥ ६॥ अथकोलाहलंश्रुत्वादंतपातध्वनिंतथा॥ पा
र्वतीशंकरोतत्रसमाजग्मतुराश्वरौ॥ ७॥ दूरेवपुरतोदृष्ट्वाकृत्तुंडेकदंतनं॥ पप्रच्छपार्वतीस्कंदंकिमेतदितिकारणं॥

सतुष्टुवुस्तदामात्रा सेनानीः सर्वमादृतः॥ २०॥ तांतंकथयामासमात्रेरामस्यशृण्वतः॥ ९॥ साश्रुवोदंतमखिलंजगतां जननीनृप॥ उवाचशंकरंदृष्ट्वापार्वतीप्राणनायकं॥ १०॥ पार्वत्युवाच॥ अयंतभार्गवःशंभोत्वय्यप्यःपुत्रसमोभवत ॥ युतोलब्ध्वापरंतेजोवरमेत्रैलोक्यजिद्विभो॥ ११॥ कार्तवीर्यार्जुनंसेव्याज्जितवानूर्जितंनृपं॥ स्वकार्यसाधयित्वातु प तातुभ्यंचदक्षिणा॥ यत्नेकृतस्यदृशनंकुठारेणन्यपातयत॥ अनेनैवकृतार्थस्त्वंभविष्यसिन संशयः॥ १३॥ त्वमि मंभार्गवंशंभोरक्षांतेवासिसत्तमं॥ तवकार्याणिसर्वाणिसाधयिष्यतिसद्गुरोः॥ १४॥ अहंनेवाव्रतिष्यामियत्व याविमनाविभो॥ पुत्राभ्यांसहितायास्यिपितुःस्वस्थानिकेतन॥ १५॥ संतोभुञ्जिष्यतेनयंसत्कुर्वत्यात्मपुत्रवत॥ भ वतातुरुतोनैवसत्कारोवत्सयासहि॥ १६॥ आत्मनस्तनयस्यास्यतोपास्यामिदुःखिता॥ वासिष्ठउ०॥ एतच्छ्रुत्वातु वचनंपार्वत्याभगवान्भवः॥ १७॥ नोवाचकिंचिद्वचनंसाकंवासाकंभूपते॥ समारमनसाकृष्णंप्रणतःकृष्णना शनं॥ १८॥ गोलोकनाथंगोपीशंनानाभूतयकोविदं॥ स्मृतमात्रोथभगवान्केशवःप्रणतार्तिहा॥ १९॥ आजगाम दयासिंधुर्भक्तवश्योखिलेश्वरः॥ मेघश्यामोविशदवद्नोल्लसत्केयूरहारोविधृतासामकरसदृशेकुंडलेसंदधान॥ वह्निपंडमणिग्रावरचितविभ्रद्दीप्तिमनास्वो गोपीनाथोगदितसुयशाःकौस्तुभोद्भासिवक्षाः॥ २०॥ राधयासहितः श्रीमान्श्रीदामाचापरावृतः॥ मुक्तसेज्ञांसिसर्वेषांस्वस्त्वात्मानवारिधिः॥ २१॥ अथैनमागतंदृष्ट्वाशिवःसंहृ ष्टमानसः॥ प्रणिपत्यथथान्यायंपूजयामासमागतं॥ २२॥ प्रवेश्यभ्यंतरंवेश्मराधयासहितंविभुं॥ रत्नसिंहास नेरम्येसादरंसन्यवेशयेत्॥ २३॥ अथतत्रगतादेवीपार्वतीतनयान्विता॥ तनामचरणान्प्रभवेः पुत्राभ्यांसहि तामुदा॥ २४॥ अथरामोपितत्रैवगत्वाप्रमितकंधरः॥ ॥श्रीकृष्ण उ०॥ अपिनगतंहितानेहितचंद्रमुखित मिमं जमद्ग्निसुतं॥ नयनिजहस्तसरोजसमर्पितमरसकंकमनंकृपणेभवभयहारिणी॥ २५॥ शंभुविहारिणीकृष्ण नाग्निकुंभिगतेतवचरणेपतिनेशततंकृताक्लिष्टमप्यवदेद्विवरं॥ २६॥श्रुणुदेविमहाभागेवेदोक्तंवचनंम म॥ यच्छ्रुत्वाहर्षितानूनंभविष्यतिनसंशयः॥ २७॥ विनायकस्तुभनयोमहात्मामहतांमहान्॥ यंकामःक्रोधउद्वेगो

भयंनाविशतेक्वा॥ २८॥ वेदस्मृतिपुराणेषुसंहितासुचभामिनि॥ नामान्यस्योपदिष्टानिसुपुण्यानिमहात्मभिः पातितानिप्रपञ्चेस्मिन्नारवक्त्राद्वहूनिच॥ प्रमथानांगणानांयेनानारूपामहाबलाः॥ ३०॥ तेषामीशस्तुयंयस्मात्गणेशस्तेनकीर्तितः॥ भूतानिचभविष्याणिवर्तमानानियानिच॥ ३१॥ ब्रह्मांडान्यखिलान्येवयस्मिन्लंबोदर ःसतु॥ यस्तिरोदेवयोगेनाङ्गेनसंयोज्यतंपुनः॥ ३२॥ गजस्यशिरसादेवितेनप्रोक्तोगजाननः॥ चतुर्थ्यामुदितश्चंद्रो दर्भिणाग्रसतआतुरः॥ ३३॥ अनेनविधृतोभालेभालचंद्रस्ततःस्मृतः॥ समःपुरासभिरुक्तमुनिभिःसंस्तयंगतः ३४॥ ज्ञातवेदाहीधितोभृग्वेनासोसूर्यकर्णकः॥ पुरादेवासुरेयुद्धेपूजितोदिवषट्कृणैः॥ ३५॥ विघ्नंनिचारयामास विघ्नानांसुरसत्तमः स्मृतः॥ अशापदेविरामेणकुठारेणनिपातित्व॥ ३६॥ दन्तंतंदेवतोभद्रेद्वैकदंतःसुतोमुनिः॥ भ विष्येत्यथपर्यायेब्रह्मणोहरवल्लभे॥ ३७॥ बक्रीभविष्यतुंडोसौदक्षतुंडस्ततोबुधैः॥ एवंतवास्यपुत्रस्यसंतिनामानि पार्वती॥ ३८॥ स्मरणात्यापहारीणिविघ्नकालानुगतान्यपि॥ अस्माच्चयोदशीकल्यानपूर्वस्मिन्दशमीभवेत॥ ३९ मयास्मैतुवरोदत्तःसर्वेद्यग्रपूजने॥ ज्ञातकर्मादिसंस्कारोगर्भाधानादिकेपिच॥ ४०॥ यात्रायांचरणेयोद्धो युद्धेदेवान्विनेशुभे॥ संकष्टेकाम्यसिध्यर्थेपूजयेद्विघ्नगजाननं॥ ४१॥ तस्यसर्वाणिकार्याणिसिध्यंतेवनसंशयः॥ ॥ वासिष्ठउ०॥ इत्युक्तेतुसमाकर्ण्यकृष्णेनसुमहात्मना॥ ४२॥ पार्वतीजगतांनाथाविस्मितासाच्छुभाननाः॥ यदानै वोत्तरंप्रादात्पार्वतीशिवसन्निधौ॥ ४३॥ तदाराधाग्रवीद्देवीशिवरूपासनातनी॥ श्रीराधाउ०॥ प्रकृतिःपुरुष श्चाभावन्योन्याश्रयविग्रहौ॥ ४४॥ द्विधाभिन्नोप्रकाशेनप्रपंचोस्मिन्यथातथा॥ तंचाहमावयोर्देवीभेदोनैवास्ति कश्चन॥ ४५॥ विस्मुरन्तमहंमेवास्मिशिवोद्विगुणतांगतौ॥ त्रिवस्यहृदयेविस्मुर्भवत्यारूपमास्थितः॥ ४६॥ म मरूपंसमास्थायविस्मोश्चहृदयेशिवः॥ एषरामोमहाभागोवैष्णवः श्रेयतांगतः॥ ४७॥ गणेशोयंस्त्रियःसाक्षा द्वैष्णवंतंसमाश्रितः॥ एतयोरावयोःप्रभोश्चाविभेदोनदृश्यते॥ ४८॥ एवमुक्तातुसाराधाक्रीडंकृत्वागजाननं॥ मूर्ध्न्यघ्राप्यचपस्पर्शस्वहस्तेनकपोलके॥ ४९॥ स्पृष्टमात्रेकपोलेतुक्षतंपूर्तिमुपागतं॥ पार्वतीसुप्रसंनाभूवनु

नीताश्चराधया॥५७॥ पादयोःपतितंरामंमुत्थाप्यनिजपाणिना॥ कोटिचकारसुप्रीतामूर्ध्नापाघ्रायपार्वती॥५८॥ एवं
तपोरतुसत्कारंदृष्ट्वारामगणेशयोः॥ रुद्रसंकरमुपाकृष्यस्वांकेप्रेम्णान्यवेशयत्॥५९॥ अथशंभुरपिप्रीतःश्रीराम
नमुपस्थितं॥ स्वोत्संगेस्थापयामासप्रेम्णासत्कृत्यमानदः॥६०॥ ॥इतिश्रीब्रह्मांडपुराणेमध्यमभागेभार्गवचरि
त्रे ८२ अध्यायः॥ ॥वसिष्ठउ०॥ एवंकथितेसतिधर्मचित्तेपुतिथेतस्मभूपते॥ भवान्युत्संगतोरामःसमुत्थाय
कृतांजलिः॥ १॥ तुष्टावप्रयताभूत्वानिर्विशेषविशेषवत्॥ अद्वयंद्वैतमापन्ननिर्गुणंसगुणात्मकं॥२॥ रामउ०॥
प्रकृतीविकृतीज्ञातेविश्वमेतद्विधाकृतं॥ ममकेयदनूभीतंवैभवंतत्प्रमाणतु॥३॥ अविदिततनुनामाभीष्टवस्तुक
धामाभवस्थभवभामापातुमोपूर्णकामा॥ प्रकटितगुणभानंकालसंख्याविधानं सकलभवनिधानंकीर्त्य
सेयत्प्रधानं॥४॥ तदिहहनिखिलनामःसंगभूवोक्षयातः कृतकृतकनिपातःपातुमामेयमातः॥ दनुजकुलवि
नाशीलोकखपातीविनाशीप्रमथकुलविकाशीसर्वविघाप्रकाशी॥५॥ प्रसभरचितकाशीभक्तदत्ताखिलाशीरव
नाविज्ञितपाशीमांसदाषण्मुखाशी॥ हरिनिकटनिवासीकृष्णसेवाविलासीप्रणतजननिभासीगोपकन्याप्रद्धा
सी॥६॥ हरकृतबहुमानोगोपिकेशोक्तानोविदितचक्रविधानोज्ञायतांकीर्तिहानो॥ प्रभुनियतमनायोनुन्नभ
क्तांतरायोहृतदुरितनिकायोतानदानापरायो॥७॥ सकलगुणगरिष्ठोराधिकांकेनिविष्टोममकृतमपराधं
क्षंतुमर्हत्यवार्धं॥ याराधाजगद्भद्रवल्लितिलयेष्वाराध्यतेयाजनैः ब्रह्मंवाध्यतीशचक्रविगलनप्रेमाप्लुता
स्वादनंरासेशीरसिकेश्वरीरमणहृन्निष्ठानिजामादितापनेत्रीसाधरिपातमामवननंराधेतियाकीर्त्यते॥९॥
यस्यागर्भसमुद्भवोह्यतिविघ्नस्यांशभूतोविराट्यंवाभ्यंतुरहोद्भवनविधिनेकांतोपदिष्टनवे॥ सृष्टंसर्व
मिदंचराचरमयंविश्वंचयद्रोमसुत्रदंनाउानिविभांततस्यजननीशश्वत्प्रसन्नास्तुसा॥१०॥ प्रेयान्यःसचरा
चरस्यजगतोव्याप्यावभुःसच्चिदानंदाब्धिप्रकटःस्तुतोविलसतिप्रेमांधपाराधया॥ कृष्णःपूर्णतमोममोपरि
रयाकृष्णातरःस्तात्सदायेनाहंसुकृतीभवामिचभवाम्यानंदलीनांतरः॥११॥ वसिष्ठउ०॥ स्तुत्वेवंजामदग्न्य

स्तुविरामंमहत्परः॥ विसातारिक्तचित्तार्थोहृष्टरोमाकृतार्थवत्॥१२॥ अथोवाचप्रसन्नात्माकृष्णःकमललोचनः॥
भार्गवंप्रणतंभक्त्याकृपापात्रंपुरस्थितं॥१३॥ कृष्णउ०॥ सिद्धोसिभार्गवेंद्रत्वंमयादत्तममसंनिधौ॥ अद्यप्रभृति
वत्साऽस्मिन्लोकेश्रेष्ठतमोभव॥१४॥ मयादत्तःतुभ्यंवरोपुराविष्णुपदाश्रमे॥ तत्सर्वंक्रमतोभाव्यंसमावह्लीत्यया
विभो॥१५॥ दृष्ट्वाविधेयादीनेयुःश्रेयउत्तममिच्छता॥ योगश्चसाधनोयोवैनृणांनियतुस्तथा॥ तत्समोना
स्तिलोकेऽस्मिन्पूजासाचवतेनच॥ ज्ञातेनयन्नामीवापीसर्वश्रेष्ठतमोभवान्॥१७॥ प्रथमंगत्वहमासाधविप्रोः
शुश्रूषणंकुरु॥ तपश्चरयथाकालंतेनसिद्धिःकरस्थिता॥१८॥ राधोत्संगात्समुत्थाप्यगणेशंराधिकेश्वरः॥ आ
लिंग्यगाढंरामेणमैत्रीतस्यचकारह॥१९॥ अथोभावपिसंप्रीतोतदारामारणेश्वरौ॥ कृष्णाज्ञयामहाभागोव
भूवतुरिंदम॥२०॥ एतस्मिन्नंतरेदेवीराधाकृष्णप्रियासती॥ उभाभ्यांचवरंप्रादात्प्रसन्नास्यामुदान्विता॥२१॥
राधोवाच॥ ॥ सर्वस्यजगतोबंधोदुराधर्षोप्रियावहो॥ मद्भक्तेष्वविशेषेणयत्कृतंभवतंकृतो॥२२॥ भवतोना
मचोच्चार्यंयत्कार्यंयःसमारभेत॥ सिद्धिंप्रयातुतत्सर्वंमत्प्रसादाद्विजस्यतु॥२३॥ अथोवाचजगन्माताभवानीभ
वबल्लभा॥ वत्सरामप्रसन्नास्तुभक्तंत्रंदेश्वर॥२४॥ तंब्रूहिमहाभागभयंत्यक्त्वाकरुस्थित॥ रामउवाच॥ जन्मांत
रसहस्रेषुयेषुयेषुव्रजाम्यहं॥२५॥ कृष्णयोर्भवयोर्भक्तोभविष्यसीतिहेहिमे॥ अंभेदेनत्वयाश्यामिकृष्णो
वापिभवेत्तथा॥२६॥ ॥ पार्वत्युवा०॥ एवमस्तुमहाभागभक्तोसिभवकृष्णयोः॥ चिरंजीविभवत्रतेप्रसा
दान्ममसुव्रत॥२७॥ अथोवाचंधराधीशःप्रसन्नस्तुमुमापतिः॥ प्रणतंभार्गवेंद्रंतंवरार्हंजगदीश्वर॥ २८॥
शिवउ०॥ रामभक्तोसिमेवत्सयतेस्तोत्रेणया॥ सभविष्यतिकात्स्न्येनसत्यमुक्तंनचान्यथा॥२९॥ अ
द्यप्रभृतिलोकेऽस्मिन्भवतोबलवत्तरः॥ नकोपिभवताबत्सतेजस्वीचभवत्परः॥३०॥ वसिष्ठउ०॥अथरु
द्रोमाप्यनुज्ञाप्यत्रिवंचनगनेशिनी॥ गोलोकंप्रययौयुक्तःश्रीराधाचाविराधया॥३१॥ अथरामोपिधर्मो
ज्ञभवानीचभवंतथा॥ संपूज्यचभवांश्चाथप्रदक्षिणमुपाक्रमत॥३२॥ गणेशंकार्तिकेयंचनत्वाऽछेवभूपते॥

अकृतव्रणसंयुक्तोनिश्चक्रामयदंतरात्॥३३॥ निष्क्रम्य माणेरामस्तुनदीश्वरमुखैर्गणैः॥ नमस्कृतोययौरा
जन्सुरूपेरयामुदा॥३४॥ ॥ इतिश्रीब्रह्मांडपुराणेमध्यमखंडेभार्गवचरित्रेऽयस्त्रिंशत्तमोध्यायः ८३
॥ ७॥ ॥ वसिष्ठउ॰ गजत्वेवंभगूनविज्ञानपश्यन्ननयद्गत्वदून॥ समाजगामधुमात्माकृतव्रणसमन्वितः॥
निरिक्ष्युःक्षत्रियाः सर्वेयत्रतत्रनिरीक्ष्यते॥ व्रजंतेभार्गवंमार्गेत्रोणंरक्षणतत्पराः॥२॥ अथाससादगर्जेंद्र
रामःस्वपितुराश्रमं॥शांतसत्वसमाकीर्णंवेदध्वनिनिनादितं॥३॥ यत्रसिंहामृगागावोनागामार्जारमूषकाः॥
समंचरंतिसंहृष्टभयंत्यक्त्वास्वकृतः॥४॥ यत्रधर्ममयीशय्यंस्वग्निहोत्रसमुद्भवं॥उन्नदंतिमयूराश्चनृत्यंति
चमहीपते॥यत्रसायंतनेकाले सूर्यस्याभिमुखंहुतैः॥ज्वलंज्वलीग्निषट्टिः क्रियतेभूर्जवल्कलः॥६॥ य
त्रांतेवासिभिर्नित्यंवेदशास्त्राणिसंहिताः॥अभ्यस्यंतेमुदायुक्तैर्ब्रह्मचर्यव्रतेस्थितैः॥७॥अथरामः प्रसन्ना
त्मापश्यंनाश्रमसंपदं॥प्रविवेशरथेनाजननकृतव्रणसंयुतः॥८॥जयशब्दनमःशब्दंप्रोज्चरद्भिर्द्विजात्मजैः॥
द्विजैश्चमकृतोरामः वरंहर्षमुपागतः॥९॥ आश्रमाभ्यंतरंतत्रप्रविश्यनिजगर्हणं॥ ददर्शपितरंरामोज्वलंत
मिवपावकं॥१०॥ साक्षाद्भृगुमिवासीनंनियम्यात्मानमव्ययं॥पपातचरणोपांतेस्वशीर्षालिंगितावनिः॥११
रामोहंतवदासोस्मिप्रोच्चरन्निति भूपते॥ जग्राहचरणौचापिविधिवत्सज्जनाग्रणीः॥१२॥ अथमातुश्चचर
णावभिवाद्यकृतांजलिः॥ उवाचप्रणतोवाक्यंतयोःसंहर्षकारणं॥१३॥ रामउ॰॥ पितुःस्तवप्रभावेनत
पसोतिदुरासदा॥ कार्तवीर्योहतोयुद्धेसपुत्रबलवाहनः॥१४॥यत्तेपराधंकृतवान्दुष्टमंत्रिप्रचोदितः॥ द
ग्धुकामोमयाहत्नः प्रसन्नामुनिपुंगव॥१५॥ भवंतंतुनमस्कृत्यगतोहंब्रह्मणांतिकं॥ तंनमस्कृत्यविधिवत्स्व
कार्यंप्रत्यवेदयं॥१६॥ समामुवाचभगवानश्रुत्वाचांतमादितः॥ प्रज्ञस्वकार्यसिध्यर्थंशिवलोकंसनात
नं॥१७॥श्रुत्वाहंतद्वचस्तातनमस्कृत्यपितामहौ॥ गतवानशिवलोकंवेदूरदर्शनकांक्षया॥१८॥प्रविश्य
तत्रभगवन्मुमयासहितःशिवः॥ नमस्कृतोमयादेवोयोचितार्थप्रदायकः॥१९॥ तदग्रेनिरवद्यःस्वीया

मा

वृत्तांतोविनिवेदितः॥ मयासर्वंसमाहूतधियासर्वश्रुतवानपि॥२०॥ श्रुत्वाविचार्यतत्सर्वंदेवेशःसंकृपान्वितः
त्रैलोक्यविजयंनामकवचंसर्वसिद्धिदं॥२१॥ तदुक्तानंनमस्कृत्यपुष्करंसमुपागतः॥ तत्रादृक्षंधार्यत्वात्तक
वचंदृष्टमानसः॥२२॥ कार्तवीर्यंनिहत्याजौशिवलोकंपुनर्गतः॥ तत्रतातमयादृष्टोदूरेस्कंदविनायकौ॥२३॥
तेनमस्कृत्यधर्मज्ञप्रवेष्टुंचौद्यतोभवं॥ समामीक्षेणगणयोर्विशंतंत्वरयान्वितः॥२४॥ वारयामाससहसा
नाद्भावसरवित्प्रभुः॥ममतेतस्मिंस्तत्रवादेयद्धंस्तकर्षणं॥२५॥ संतानंपरशंक्षेभुंमनोभद्गुनंदनः॥ सतंद्वा
रमसमुद्यमंधश्चोर्ध्वममेवच॥२६॥ कराणभ्रामयामासपुनश्चानीतवांस्ततः॥ तदृष्ट्वातत्कृतंतस्मिंसकुमारो
द्विमोचतः॥२७॥ ईतोनिपतितस्तस्यसतीदेवउपागतः॥ पार्वतीतत्रदृष्ट्वाभूत्तदाक्रुद्धःसमागतः॥२८॥ राध
यासहितस्तेनसानुनीतावरंददौ॥ मह्यंरुष्टोज्जगामाथतेनमेवीर्यधायच॥२९॥ ततःप्रणम्यदेवेशंपार्वती
परमेश्वरीं॥ आगतस्तवसंनिध्यमकृतव्रणसंयुतः॥३०॥ वसिष्ठउ॰॥ इत्युक्त्वाभार्गवोरामोविरामंचभूप
ते॥ जमदग्निरुवाचेदंरामंस्नेहनिबंधनं॥३१॥ जमदग्निरुवाच॥ क्षत्रहत्याभिभूतस्तत्तातदोषोपशांतये॥
प्रायश्चित्तंततस्तावद्यथावत्कर्तुमर्हसि॥३२॥ जमदग्निरुवाच॥ व्रतेश्चनियमैश्चैवकर्षयदेहमात्मनः॥ शाकमू
लफलाहारोद्वादशाब्दंतपश्चर॥३३॥ वसिष्ठउ॰॥ इत्युक्तःप्रणिपत्येनंमातरंचभृगूद्वहः॥ प्रययौतपसेराज
न्कृतव्रणसंयुतः॥ समागत्यापवर्तंवैरमेंद्रमरिकर्षणः॥ कृत्वाश्रमपदंतस्मिंस्तपस्तेपेसुदुस्तरं॥३५॥ व्रतैस्त
पोभिर्नियमैर्दधताराधनेरपि॥ निन्येचपर्याणिकेचिच्चितरामस्तस्मिन्महात्मनाः॥३६॥ ॥ इतिश्रीब्रह्मांड
पुराणेमध्यमखंडेसगरोपाख्यानेभार्गवचरित्रे ८४ अशीतितमोध्यायः॥ ॥ वसिष्ठउ॰॥ ततःकदाचिद्विपिनेच
तुरंगबलसन्वितः॥ मृगयामागमत्करःशरसेनादिभिःसह॥१॥ तेप्रविश्यमहारण्यंहत्वाबहुविधान्मृगान्
जग्मुरुत्पातमध्यान्हेसरितंनर्मदामनु॥२॥ तत्रस्नात्वापीतवारिनद्यागतश्रमाः॥ गछंतोदृदृशुर्मार्गे
जमदग्नेरथाश्रम॥३॥ दृष्ट्वाश्रमपदंरम्यंमुनीनामगछतःपथि॥ कस्येदमितिपप्रछुर्भार्गवंकर्मप्रचोदितः॥४॥

तेब्रोचुरतिसंतप्तास्तज्जमदग्निमहातपाः॥ वसत्यस्मिन्मृतोयस्यरामःशस्त्रभृतांवरः॥ ५॥ तच्छ्रुत्वाभीरभूतेशा
रामनामानुकीर्तनात्॥ क्रोधंत्रमत्वानन्दशंपूर्ववैरमनुस्मरन्॥ ६॥ अथतेब्रुवन्योन्यंपितृहंतुर्वधात्पितुः॥
वैरनिर्यातनंकिंचित्करिष्यामोदृशाधुना॥ ७॥ इत्युक्त्वारुदृहुस्तालंसंत्रविश्यतदाश्रमे॥ प्रजाद्वारेप्रयातेषु
मुनिवीरेषुसर्वतः॥ ८॥ तंहत्वास्यशिरोभूत्वानिषादाइवनिर्दयाः॥ प्रययुस्तेदुरात्मानःसवत्साःस्वपरीप्रति
॥९॥ पुत्रास्तस्यमहात्मानोदृष्ट्वासुपितरंहतं॥ परिवार्यमहाराजरुरुदुःशोककर्षिताः॥ १०॥ भर्तारंनिहतंभूमौ
पतितंवीक्ष्यरेणुका॥ पपातमूर्छितासद्योलतेवासनिताडिता॥ सास्वचेतसिसंमूर्छ्यशोकपावकदीपिताः॥ दुर
प्रनाष्टसंज्ञेवसद्यःप्राणैर्व्ययुज्यत॥ १२॥ अमात्कथात्यांतस्यांतुसंज्ञायांतुहृतेःपुनः॥ न्यपतन्मूर्छिताभूमौ
निमग्नाशोकसागरे॥ १३॥ ततस्तपोधनार्यान्येतत्रयोवनवासिनः॥ समेत्याश्वासयामासुरुरुदुःखासुता
न्मुने॥ १४॥ सांत्यमानामुनिगणैर्जामदग्न्यायथाविधिः॥ अधाक्षुर्वचसातेषांमृतोपित्रोःकलेवरे॥ १५॥
चक्रुरेवतदूर्ध्वंयत्कर्तव्यमनंतरं॥ पित्रोर्मरणदुःखेनपीड्यमानाश्चिरंनिशं॥ १६॥ ततःकालेगतेनामःसमानो
हृदशाबथो॥ निरुत्तःस्तपशःसंख्यासप्तरात्राश्रमंपितुः॥ १७॥ ॥इतिश्रीब्रह्मांडपुराणेमध्यमभागेसग
रोपाख्यानेभार्गववंशचरित्रेपंचाशत्तमोध्यायः ५०॥ ॥श्री॥ वसिष्ठ॥ सगरस्यापिशुश्रावमुनि
भ्यस्तत्वमादितः॥ राजपुत्रव्यवसितंपित्रोःस्वर्गतिमेवच॥ १॥ पितुस्तजीवहरणंक्रोशेहरणमेवच॥ तन्मृते
श्वमरणंश्रुत्वामानुश्यकेवलं॥ २॥ विललापमहाबाहुःदुःखशोकसमन्वितः॥ नमयाश्वासयामाससतुः
ल्यदुःखोरुतद्व्रणः॥ ३॥ हेतुभिःशास्त्रनिर्दिष्टैर्वीर्यसामर्थ्यसूचकैः॥ युक्तिलोकिकदृष्टांतैःसतंशोकंस्य
शामयत्॥ ४॥ सांत्वितस्तेनमेधावीधृतिमालंब्यभार्गवः॥ प्रययौसहितैःसख्याभ्रातृणांतुदिदृक्षया॥ ५॥
सतांदृष्ट्वाभियाघेनांदुःखितान्दुःखकर्षितः॥ शोकामर्षसुतस्नेहैश्चसंदीप्तेरिवचाग्नयः॥ ६॥ ततोस्यक्रमशोन्
क्रोधंस्मरतोनिधनंपितुः॥ बभूवसहसासर्वंःलोकसंहरणक्षमः॥ ७॥ मातरंचैवसंतप्तांपूर्वंप्रातिसत्यसंगरः॥

दृष्ट्वाचक्रेमहद्दुःखंसर्वक्षत्रवधोद्यतः॥ ८॥ क्षत्रबंधूनशेषेणहत्वातंदेहतोहृतेः॥ करिष्यतर्पणंवक्षोगतिनि
श्चित्यभार्गवः॥ ९॥ भ्रातॄणांचैवसर्वेषांआख्यायान्ममसोहृतं॥ प्रययौतदनुज्ञाताःकृत्वासंस्थापितक्रियां
॥ १०॥ अकृतव्रणसंयुक्तःप्राप्यमाहिष्मतींततः॥ तद्वाह्योपवनेस्थित्वासस्मारसमहोदरः॥ ततस्मेरथचापाद्यं
सदृसादृसमन्वितं॥ प्रेषयामाससंग्रामायसर्वसंदूननानिच॥ १२॥ सोपिरथमारुह्यसंनद्धःसशरंधनुः॥ गृही
त्वापूरयन्घंघरुदंतंचमामित्रजित॥ १३॥ ज्याघोषंचचकारोच्चैरीदृशंकथियन्निव॥ सदृशाहोथसारथ्यंचक्रेशार
थिनांवरः॥ १४॥ रथस्यशंखनादेनविधात्रोरमर्षणः॥ तस्याभून्नगरीसर्वासंक्षुब्धश्वनरद्विषा॥ १५॥
रामंत्वागतमाज्ञाय सर्वक्षत्रकुलांतकं॥ संक्षुब्धाश्चक्रुरोगंसंग्रामायनरयात्मजाः॥ १६॥ अथपंचरथःशूरः
शूरसेनारयोनृपः॥ रामेणयोद्धुसहितोराजभिश्चकुरुद्यमं॥ १७॥ चतुरंगबलंप्रेषयततस्तेक्षत्रियर्षभाः॥ राम
मासाद्यासक्तपतंगाइवपावकं॥ निवार्यतानपतयोरथेनैकेनभार्गव॥ युयुधेपार्थिवैःसर्वैःसमरोमि
तविक्रमः॥ १९॥ ततःपुनरभूद्युद्धंरामस्यसहराजभिः॥ जघानयत्रसंक्रुद्धोराजांसतमुदारधीः॥ २०॥ ततःसश्र
मंनादान्हत्वासबलवाहनान्॥ क्षणेनकृत्स्नयामाससक्षितौक्षत्रियंरणे॥ २१॥ ततस्तेभग्नसंकल्पाहस्वतेब
लवाहनाः॥ हतःक्षिप्रान्यपतयोदुद्रुवुःसर्वतोदिशं॥ २२॥ एवंविद्रुव्यसेन्यानिहत्वाजित्वाचसंयुगे॥ जघा
नशतशोराज्ञःशरांसच्छस्वतोरहः॥ ततःक्रोधपरीतात्मादग्धुकामाखिलापुरं॥ ह्रदेरयतभार्गवोब्रह्मकाल
ग्निसदृशंप्रभो॥ २४॥ ज्वालाकवलिताशेषपुरप्राकारमालिनं॥ पुरींसदृश्यधनरांसदृष्ट्वाहस्त्रावचक्रुः॥
२५॥ दह्यमानांपुरींदृष्ट्वाप्राणत्राणपरायणः॥ जीवनाशंसमानासकीतिदीनोभयातुरः॥ २६॥ अस्त्राग्निना
पुरींसर्वांदग्ध्वाहत्वावशात्रवान्॥ प्रायायानोखिलान्लोकान्साक्षात्कालइवांतकः॥ अकृतव्रणसंयुक्तःसदृसा
हनवाहितः॥ जघामरथघोषेणकंपयन्निवमेदिनीं॥ २९॥ विनिघ्नन्क्षत्रियान्सर्वान्संग्राम्यरथिवीत
कः॥ महेंद्राद्रेर्ययौरामोतपसेधृतमानसः॥ २९॥ तस्मिन्नब्दशतंचैवयावत्क्षत्रसमुद्भवं॥ प्रत्येत्यभूपः

सप्तकृत्वेवपृथिवीमकरोध्दतव्रतः॥ ३७॥ क्षत्रक्षयेचपृथिवीप्रभूपश्चतत्रमुत्पादितंदुष्टैः॥ निःक्षत्रायांपुनर्भूमौराज्ञः सतस्यैस
दृक्षद्रुः॥ ३८॥ वर्षेद्वयेनभूयोपिकृत्वानिःक्षत्रियांमहीं॥ षट्चतुष्टयवर्षांतंतपरलेपेपुनश्चसः॥ ३९॥ भू
योपिराजन्संवृद्धक्षत्रमुत्पादितंदुष्टैः॥ जघानभूमौनिःशेषं साक्षात्कालइवांतकः॥ ४०॥ कालेनतावता
भूयः समुत्पन्नंनरपात्ययं॥ निघ्नश्चचारपृथिवींवर्षद्वयमनारतं॥ अकरोन्मेणराजेंद्रस्मरणानिधनंपितुः॥ त्रिःस
प्तकृत्वेःपृथिवीतननिःक्षत्रियाकृताः॥ ४१॥ त्रिःसप्तकृत्वस्तन्मातायदुरःसमवाअयत॥ तावद्रामेणतस्मात्तु क्षत्र
मुत्पादितंभुवि॥ ४२॥ ॥ इतिश्रीब्रह्मांडपुराणेमध्यभागेभार्गवचरित्रेषड्विंशतितमोध्यायः॥ २६॥ ७
वसिष्ठउ०॥ ततोमृधेनविक्रांतारामामिततेजसा॥ षट्सप्तकृत्वद्वयराजीवग्रहीततवान्॥ १॥ ततोराजसहस्रा
णिगृहीत्वामुनिभिःसह॥ सप्तजग्मुर्महीतेजाःकुरुक्षेत्रंतपोमयं॥ २॥ सरस्तत्रपंचकंतत्रखनयित्वाभ्रगूद्वहः॥
मुखाच्चगादतीर्थानितानिचक्रेसमंततः॥ ३॥ जघानतत्रवैराजःशरीरप्रभवासृजा॥ सरांसितानिवैपंच पूरय
मासभार्गवः॥ स्नातातेषुयथान्यायंजमदग्न्यःप्रतापवान्॥ पितॄंस्तर्पयामासयथाशास्त्रमुदंद्वितः॥ ५॥
पितुःप्रेतस्यराजेंद्रश्राद्धादिकर्मसंयतः॥ ब्राह्मणैःसहमातुश्चतत्रचक्रेयथोदितं॥ ६॥एवंतीर्णप्रतिज्ञःसकुरु
क्षेत्रेतपोमयः॥ उवासातंद्रितःसम्यक्पितॄन्प्रजापरायणः॥ ७॥ ततःप्रभृत्यभूद्राजन्तीर्थानामुत्तमोत्तमं॥
विश्रुतंजामदग्न्येनकुरुक्षेत्रेतपोयमं॥ ८॥ स्यमंतपंचकमितिस्थानंत्रैलोक्यविश्रुतं॥ यत्रचक्रेभृगुश्रेष्ठपितॄणां
तृप्तिमक्षयं॥ ९॥ स्नानदानतपोहोमदृष्टभोजनतर्पणैः॥ भक्त्यापापहितास्तेनयत्रतेपितरोखिलाः॥ १०॥ अ
वाप्युरक्षयांतृप्तिंपितृलोकंचशाश्वतं॥ स्यमंतपंचकंनामतीर्थलोकेपरिश्रुतं॥ सर्वपापक्षयकरंमहापुण्यापहं
दृतं॥ मृत्योर्नायत्रपापानांमनागपि॥ नाविक्षानितु॥ १२॥ दूरादेवायपास्यंतिप्रवातेशुष्कपर्णवत॥ तत्क्षेत्रंचर्षी
गमनंमर्त्यानामसतामिह॥ १३॥ नरुभ्यतेमहाराजज्ञातुंजन्मशतैरपि॥ स्यमंतयत्रवैतीर्थंकुरुक्षेत्रेतिपावने॥ १४॥ यत्रस्नानंसर्वतीर्थैःस्नातोभवतिमानवः॥ कृतकृत्यस्ततोएमः सम्यक्पूर्णमनोरथः॥ १५॥ उवासत

अनियतः कंचित्कालमहामतिः॥ ततःसंवत्सरस्यांतेब्राह्मणैःसहितोवशी॥ १६॥ पितॄंश्चंद्रसानाथज्ञामदग्न्योगम
दृक्षः॥ ततोगत्वाततश्चाद्धंयथान्यायमकारयत्॥ १७॥ ब्राह्मणंतर्पयामासपितॄन्दृष्ट्वासतृप्तान्॥ श्रीवत्सवक्षं
स्थानंचंद्रवादमितिस्मृतं॥ १८॥ पितॄणांप्रीतिकरंश्रेष्ठंतादृग्लोकेनविद्यते॥ यत्राक्षयंतःस्वकुलंतेर्यथाशक्तिमनागपि
॥ १९॥ पितरःपिंडदानाद्यैःप्राप्स्यंतिगतिमक्षयं॥ पितॄन्दृष्ट्वतत्रायोतर्पितेषुद्विजातिषु॥ २०॥ दृष्ट्वाचविधि
वत्पिंडंपितृभक्तिसमन्वितः॥ ततःस्तुतिपरःसर्वैपितृलोकादुपागताः॥ २१॥ तंरुद्रंस्तुतवंतंपूजांतंजमदग्निषु
रोगमाः॥ अथतेप्रीतमनसाःसमेत्यभृगुनंदनं॥ २२॥ कृतस्तुतिपरःदृष्ट्वाभृत्वांतुरीक्षगाः॥ पितरऊचुः॥
महत्कर्मकृतंवीरभवतात्यैःसुदुष्करं॥ २३॥ अस्मान्नाप्नियथान्यायंसम्यक्कृतर्पितवानसि॥ अस्माकमक्ष
यांप्रीतिंतथाविस्तंनयछसि॥ २४॥ क्षत्रहन्यादितःकृत्वाकृतकर्माभवद्यतः॥ क्षेत्रस्यास्यप्रभावेनभक्तश्च
तपरःसुतं॥ २५॥प्राप्तास्मःस्मृतितःकिंतुनक्षेत्रेफलभागिनः॥ तस्मात्वंवीरदृष्ट्वादिपापंप्रशमनायहि॥ २६॥
प्रायश्चित्तंयथान्यायंकुरुधर्मंचशाश्वतं॥ वधाच्चविविवर्तस्वक्षत्रियाणामतःपरं॥ २७॥ पितृनंतेपराध्यंतेनस्व
तंत्रंयतोजगत॥ तन्निमित्तंतुमरणंपितृलोकेदितेपरा॥ २८॥ हंतुंकःसमर्थस्यात्कोरक्षितुमेवचा॥ निमि
त्तमात्रमवहेसर्वेसर्वस्यचेतसः॥ २९॥ ध्रुवंकर्मानुरूपंतेचेष्टंतेसर्वएवहि॥ कालानुरूपंचलवान्लोकेनात्रसं
शयः॥ ३०॥ बाधितुंभुविभूतानिभूतानांनाविधिंविना॥ शक्यंतेनत्वसर्वोपिपतः शस्त्रास्वकर्मरुत्॥ ३१॥ अत्र
प्रतिततोरोषंविमुच्यास्मत्प्रियंकुरु॥ ग्राममाशुहिभद्रंतेसह्यस्माकपरंबलं॥ ३२॥ ॥ वसिष्ठउ०॥ इत्युक्तोतदृ
षेःसर्वेपितरोभृगुनंदन॥ संवाप्यतद्वचःसर्वेप्रतिजग्राहुसादरं॥ ३३॥ अकृतव्रणसंयुक्तमुशनापरमंयायुत
॥ पप्रथोचतदारामःतस्मात्सिद्धवनाश्रमं॥ तस्मिन्नरुतोभृगुश्रेष्ठोब्राह्मणैःसहितोन्वय॥ तर्पयंश्चतसंक
ल्पोबभूवसमहामनाः॥ ३५॥ सरथंसहसाहूंचधनुःसंदूतनानिचं॥ पुनरागमसंकेतंकृत्वाप्रस्थापयत्तदा॥ ३६॥
ततःससर्वतीर्थेषुचक्रेस्नानमतंद्रितः॥ परीत्यपृथिवींसर्वांपितॄन्दृष्ट्वादृष्टकृत्॥ ३७॥ एवंक्रमेणपृथिवींत्रिवारं

भृगुनंदनः॥ पारिप्लवकामराजेंद्रलोकृत्यत्तमनुव्रतः॥३८॥ ततः सपर्वतश्रेष्ठंमहेंद्रंपुनरभ्यथ॥ जगामतपसेराजन्न
ब्राह्मणैरभिसंयुतः॥ सतस्मिन्चिरकालायशुनिसिद्धानिषेविते॥ निवासमात्मनोराजन्कल्पयामास धर्मवित्॥
५०॥ मुनयस्तेतपस्यंतंसर्वक्षेत्रनिवासिनः॥ द्रष्टुकामाः समाजग्मुर्नियताब्रह्मचारिनः॥ ५१॥ दृष्ट्वशुक्लंमुनिगणास्तं
पस्यासक्तमानसं॥ क्षात्रंकर्ममशेषेण दग्ध्वाशांतामिवानलं॥ ५२॥अथतानागतान्दृष्ट्वा मुनींद्रियांस्तपोमया
न्॥ अर्घ्यादिसमुदाचारैः पूजयामासभार्गवः॥५३॥ कृतकौशल्यसंप्रश्नंपूर्वकाः सुमनोहराः॥ तेषांतस्यचसंजज्ञा
कथा-पुण्यामनोहराः॥५४॥ ततस्तेषामनुमतेमुनीनांभावितात्मनां॥ हृयमेधंमहायज्ञमाहर्तुमुपचक्रमे॥ ५५॥
संभृत्यसर्वसंभारैस्तोर्वोधैः साहितोनृपः॥ विश्वामित्रभरद्वाजमार्कंडेयादिभिस्तथा॥ तेषांमतमनुमतेकृत्वाकश्य
पंगुरुमात्मनः॥ याज्यमेधंततोराजन्नेआज्ञारमहाक्रतुं॥५६॥ तस्याभूत्कश्यपोध्वर्युरुद्गातागौतमोमुनिः
विश्वामित्रोभवद्धोतारामस्यविदितात्मनः॥५७॥ ब्रह्मत्वमकरोत्तस्यमार्कंडेयोमहामुनिः॥ भरद्वाजाग्निवेश्या
द्यावेदवेदांगपारगः॥ मुनयश्चक्रुरन्यानिकर्माण्यन्यथाक्रमं॥ पुत्रैःशिष्यैः प्रशिष्यैश्चसहितोभगवान्भृ
गुः॥५८॥ सादस्यमकरोद्राजन्नन्यैश्चमुनिभिःसह॥ सर्तेः सहाखिलंकर्मसमाप्यभृगुपुंगवः॥५९॥ ब्रह्माणंपू
जयामासयथावत्गुरुणासह॥ अरुंधत्यायथान्यायंकन्यारूपवतींमही॥५०॥ पुरयामेशतेषांतांसमुद्वोवरमा
ह्निनां॥ आहूयभृगुशार्दूलसुशीलवनकाननां॥ कश्यपायदृशैसर्वांमतेतांशीलसुव्रतां॥ आत्मनःसनिवासा
र्थंतंरामः पर्वकृत्ययत॥५२॥ ततःप्रभृतिराजेंद्रसृजयामासशास्त्रतः॥ हिरण्यरत्नवस्त्राश्वगोगजान्महिभि
रुत्थाः॥५३॥ पुरासमाप्ययज्ञांतेतथाचावभृथाप्लुतः॥ चक्रेद्रव्यपरित्यागंतेषांमनुमतेतदा॥५४॥ दत्वाचसर्वं
भूतानांसमयंभृगुनंदनः॥ तत्रापिपर्वतवरेतपश्चर्तुसमारभत॥५५॥ ततस्तंसमनुज्ञायसदस्याऋत्विजस्तथा
॥ ययुर्यथागतंसर्वेमुनयः संशितव्रताः॥५६॥ एतेषुतेषुभगवन्कृतप्रणमसंयुतः॥ तपोमहत्समाख्यायतत्रै
वन्यवसत्सखी॥५७॥ काश्यपीतुततोभूमिर्जनेनाथासनेकशः॥ सर्वदुःखप्रशांत्यर्थमरीचानुमतेनतु॥५८॥

DR. SHAU DAJI MEMORIAL

तभद्रीपप्रतिष्ठार्थंव्रतंविस्मृतवोदितं॥ चत्वारधरणीसम्यक्दुःखेमुक्तभवच्चसः॥५९॥ इत्येवज्ञामरग
न्यस्यप्रादुर्भावउद्गतः॥ यस्मिन्श्रुतेनरःसर्वपातकैर्विप्रमुच्यते॥६०॥ प्रभावःकार्तवीर्यस्यलोकेप्राप्ततेजस
॥ प्रसंगात्कथितःसम्यक्नातिसंक्षेपविस्तरः॥ एवंप्रभावःसन्नृपः कार्तवीर्योभवद्गुरुः॥ नातदृशःपुमान्कश्चि
द्भूतोभूतोयथाश्रुतः॥६२॥ इत्यात्रेयाद्गुरुंवव्रेस्मृतिमुक्तमपूरुषात्॥ यत्पुरामोघमत्युग्रंरणरामेणघातितः॥
तस्यात्मंचमःपुत्रः प्रख्यातोयोजयध्वजः॥ पुत्रस्तस्यमहाबाहूरलातलंजघोभवन्नृप॥६४॥ अभूत्तस्यापिपुत्रा
णांशतमुत्तमधन्विनां॥ तालजंघाभिधंयेषांवीतिहोत्रोग्रतोभवत॥६५॥पुत्रैःसवीतिहोत्राद्यैर्हैहयाद्यैश्च
राजभिः॥ कालेमहांतमवसत्हिमाद्रिवनगह्वरे॥६६॥ यःपूर्वंरामबाणेनरक्तन्स्रोभितादितः॥ तालजंघो
पतद्भोमूर्छितोगाद्धरेरनः॥६७॥ दृष्ट्वावीतिहोत्रंतंद्रक्तन्स्रेवपरिप्लवं॥ रथमारोप्यवेगेनपालयेनप
रोभवत॥६८॥ तेतत्रन्यवसत्सर्वेहिमाद्रेभवपार्श्वतः॥ कृछ्रंमहांतमासाद्यशाकमूलफलाशनः॥ ततःशांते
गतेरामेतपस्यासक्तमानसे॥ तालजंघस्तुकौरव्यंसपुत्रःप्रत्यपद्यत॥७०॥ संनिवेश्यपुरीभूयःपूर्ववन्नृपसत्त
म॥ वृसंस्तदानिजंराज्यमवालयदरिंदमः॥ सपुत्रःसानुगबलःपूर्ववैरमनुस्मरन्॥ अभ्यायेयोमहाराजता
लजंघेपुरंतव॥७२॥ चतुरंगबलोपेतःकंपयंनिवमेदिनीं॥ रुरोधाभ्येत्यनगरीमयोध्यांसमहीपतिः॥
७३॥ ततोनिःक्रम्यनगरात्फल्गुतंत्रोपितोबिता॥ युयुधेतैर्नृपैःसर्वैर्दृढोवितरणोयथा॥७४॥निहतानें
कमातंगतुरंगरथसैनिकाः॥ रात्रुभिर्निर्जितोरुद्रुःपलायनपरोभवत्॥त्यक्तसनगरंराज्यंशकोग्रबलवा
हनं॥ अंतर्वत्न्याचतेमात्रासहितोवनमाविशत्॥ तत्रचोर्वाश्रमोपांतेनिवसन्चिराद्विजा॥ शोकक्रमर्षस
माविष्टोरुद्रंभावेनचस्वयं॥७७॥ विलोक्यमानोमात्रातेवाक्यगद्गदकंठया॥ अनाथइवराजेंद्रस्वर्गलोकं
मितोगतः॥७८॥ ततःस्नेहजननीराजन्दुःखशोकसमन्विता॥ चिंतामारोपयद्भर्तुरुदतीसांकुलेश्वरं॥७९॥
असनाप्यात्मदुःखेनभर्तुर्व्यसनकर्शिता॥ चकाराग्निप्रवेशायसद्दोमतिमात्मनः॥८०॥ और्वोरलदक्षिणं

श्रुत्वास्य यमेवमहामुनिः॥ निर्गत्यचाश्रमाच्चैवारयंनिदमब्रवीत्॥ ८१॥ नमर्तव्यंत्वयागत्वासांप्रतंजन्तुरेतय॥ पुत्र
क्लिष्टमतिर्वैषांप्रवरश्चक्रवर्तिनां॥ ८२॥ इतितद्वचनंश्रुत्वामातातवमनस्विनी॥ विरागमगतेस्तांतु मुनिस्वाश्रममानय
न्॥ ततःसासर्वदुःखानिनियम्यतनमुखांयुजं॥ दृष्ट्वाश्रमोपांतेतस्यैवन्यवसत्सुखं॥ ८४॥ मुनिर्वचरतः
कालेसत्वामोर्वाश्रमेतदा॥ ज्ञातकर्मादिकंसर्वं भवतः साकरोन्मुनिः॥ ८५॥ और्वाश्रमेविरुद्धश्चभवांस्तेनानुकंपि
तः॥ त्वयैवविदितं सर्वमतःपरमरिंदमः॥ ८६॥ एवंप्रभावोन्नपतिकार्तवीर्योतवद्रुचि॥ व्रतस्यास्यप्रभावेनसर्व
लोकेषुविश्रुतः॥ यद्रणेऽर्जितोयुद्धेवितानेवतमोविशत॥ तद्वृत्तंतमशेषेणमयातेसमुदीरितं॥ ८८॥ एतच्चस
र्वमाख्यातंव्रतानांमुत्तमंतव॥ समंव्रतंत्वलोकेषु सर्वलोकफलप्रदं॥ ८९॥ नह्यस्यरुनृपतेःपुरुषार्थचतुष्टये॥
भवत्यभीप्सितंकिंचित दुर्लभंभुवनत्रयं॥ ९०॥ संक्षेपेणमयाख्यानंव्रतंदैहयभूभुजः॥ जमदग्न्यस्यचमुने
किमन्यत्कथयामिते॥ ९१॥ ॥ ओमित्युवाच॥ ततःसगरोराजाकृतांजलिपुटोमुनिं॥ उवाचभगवन्नेतत्कर्तुमिच्छा
म्यहंव्रतं॥ ९२॥ सम्यक्कमुपदेशेनतत्रानुज्ञांप्रयच्छमे॥ कर्मणानेनविप्रर्षेकृतार्थोस्मिननसंशयः॥ इत्युक्तस्तेन
राज्ञातुतथेत्युक्त्वामहामुनिः॥ हर्षंहृद्यांसमोराजानंशास्त्रोक्तेनैववर्तता॥ ९४॥ सहाक्षितोवसिष्ठेनसगरोरा
ज्यसत्तमः॥ द्रव्याण्यानीयविधिवत्प्रचक्रेशुभव्रतं॥ ९५॥ पूजायित्वाजगन्नाथंविधिनातेनयाथिवः॥ समा
प्यचयथान्यायंप्रतुज्ञायगुरुंततः॥ ९६॥ प्रतिज्ञामकरोद्राजाव्रतमेतदनुत्तमं॥ आज्ञावानंधरिष्यामिय
त्नेनेतिमहामतिः॥ ९७॥ अथानुज्ञाप्यराजानंवसिष्ठोभगवानृषिः॥ संनिवर्त्यानुगंतंप्रजगामनिजाश्र
मं॥ ९८॥ ॥इत्यादिमहापुराणेब्रह्मांडखंडेमध्यमभागेसगरोपाख्यानेवसिष्ठप्रतिगमनोनामसप्ता
शीतितमोध्यायः॥ ८७॥ ॥ ओमित्युवाच॥ गतेतस्मिन्मुनिवरेसगरोराजसत्तमः॥ अयोध्यायामधि
वसनपालयामासमेदिनीं॥ १॥ सर्वसंपद्गुणोपेतः सर्वधर्मार्थतत्ववित्॥ ययौसेवसवाल्लोभात्कर्मणाद्रु
समतेः॥ तथापिनदिवाभुंक्तेशेतेवानिशमस्मरन्॥ सुदीर्घानश्वसित्पूरंमुद्विग्नहृदयोनिशं॥ ३॥श्रुत्वा
राज्ञास्वराज्यंनिजगुरुमवज्ञातपारिभिः संगृहीतंमात्रासार्धंप्रयातंवनमतिगहनंस्वर्गतंतंचतस्मिन्॥ शोकाविष्टं
सरोषंसकलरिपुकुलोच्छेदतोसत्प्रतिज्ञश्चक्रेसद्यःप्रतिपरिभवनंसोदुमिक्ष्वाकुवेश्याः॥ ४॥ सकृत्राचिन्महीपा
लःकृतकोतुकमंगलः॥ रिपुंजेतुमनश्चक्रेदृशश्वसकलाःक्रमात्॥ ५॥ अनेकरथसाहस्रैर्गजाश्वरथसेनकैः॥
सर्वतः संवृतोराजानिश्चक्रम्यपुरीभयात्॥ ६॥ वीरंहैहयंप्रतिरुंधिनिजबलनिवहैनोन्यतद्भूसुरंगैर्नानासत्वोर्मि
जालान कुलजलधिनिभेनाथषाडंगकेन॥ ७॥ मत्तेर्मातंगयूथैः सकुलगिरिकुलैर्नेवभूमंडलेनश्चेतछ
त्रध्वजाद्यैरपिशक्तिरकृताभ्राद्यखेनव साधंतस्याग्रेसरसैन्ययूथचरणप्रक्षुण्णशोल्लोचपक्षोदापूरितनि
म्नभागमवर्तीपालस्यसंख्यास्यतः॥ ९॥ प्रत्येकंचतुरंगसैन्यनिकरप्रक्षोदसंभूतभरेणप्रवृत्तिरुल्लंघसम
भवद्भूमिरुनत्रानिशं॥ १०॥ प्रसृतिरुद्यननिधामविरिपूणां दूराद्देवाभिसंसन्नरिनगरनिरीक्षेकमोभिर्ब
गोतेषांशोश्वाद्यपाल्पणमभिद्रुतप्राणिधेयंविधत्ता॥ ११॥ विज्ञप्तीपुर्दृशारक्षारक्षायस्याभिवास्य
ति॥ विषयेसत्पुरुस्यसद्यःप्रणतिमेष्यति॥ १२॥ विज्ञप्त्यन्पतीन सर्वानुक्त्वाचस्वपदानुगान्॥ संकेतगामि
नःकृश्चित्कृत्वाराज्येन्यवर्तत॥ १३॥ एवंसविस्तरन्दृष्ट्वादृशिणाभिमुखोन्नपः॥ स्मारन्पूर्वकृतंवैरंहैहयान
भ्यवर्तत॥ १४॥ ततस्तस्यन्पैःसार्धंसमग्ररथकुंजरैः॥ बभूवहैहयैर्वीरैः संग्रामोरोमहर्षणः॥ १५॥ राज्ञो
पत्रसहस्राणिसप्तलक्षाणिमहारथैः॥ निजघानमहाबाहुःसंकुद्धःकोसलेश्वरः॥ जित्वाहैहयभूपालान्भंक्त्वा
दृप्तान्ततःपुरी॥ चापहस्यभयेष्टे - -श्वर्यादृततविषः॥ १७॥ राज्ञोनाहतभर्यिष्याव्यद्रवंतेसमंततः॥ अभिद्रु
त्यनृपांस्तांस्तु द्रवमाणान्महीपतिः॥ १८॥ जघानसानुगान्मत्तः प्रजाःकुद्धइवांतकः॥ ततस्तान्प्रतिसंक्रोध
ः सागरः समरेरिहा॥ १९॥ मुमोचास्त्रंमहारौद्रंभार्गवंरिपुभीषणं॥ तत्तत्सदृशतिरोद्भिर्भुवनभयदप्रस्फ
रद्भार्गवास्त्रज्वालार्दृष्ट्वमानावशतनुतपस्तनयाः॥ सघएवाद्यस्त्राद्धतधूमाद्भपदत्तमामुष्टदृष्टिप्र
साराश्चेमूर्भिप्रष्टलोष्ठैर्द्रुतमरजोगूढगात्रामुहूर्तं॥ २१॥ आग्नेयास्त्रप्रतापप्रतिहतगतयोदृष्टमार्गा

समंतात्॥ भूपालानष्टसंघापरवशजनवोन्याकुलीभूतचिंताः भीताः संत्यक्तवस्त्रायुधकवचविभूषानुगा मुक्तकेश
॥२३॥ विस्मरोन्मत्तभावानभ्रशतरमनुकुर्वत्यग्रतः शत्रवानां॥ वित्तत्यद्दूयान्सर्वान्समरेसगरोबली॥ सं
ऋध्यसागराकारः कांबोजानभ्यवर्तत॥२४॥ नानावादित्रघोषाद्भुतपटहरवाकर्णनध्वस्तधैर्यसघः संत्यक्तरा
ज्यस्तबलपुरपुरंध्रीसमूहविमूढाः॥ कांबोजस्लालखंघाः शकयवनकिरातादयः साकमेतेभ्रमद्भूर्यस्त्रभीत्या
द्विग्राद्दिशिरयवोयस्यपूर्वापराधाः॥२६॥ भीतास्तस्यनरेश्वरस्यरिपवः केचित्प्रतापातलज्लालामुद्गूरणोविस्म
वसतेराज्यंचपुत्रादिभिः॥ द्रुतसैन्येः समभिद्रावनभवंसंप्राप्यतत्रापितेलोमित्यंसमुपागतागिरिगुहास
मोश्रितेनद्विषः॥२८॥ तालजंघान्हत्वाजोरहसाबलवाहनात्॥ क्रमेणनाशयामासतद्राज्यमरिक्षयंवयन
॥२९॥ ततोयवनकांबोजाः किरातादीननेकशः॥ निजघानरुषाविष्टः पल्हवान्पारदानपि॥३०॥ हन्यमानास्तत
सर्वेराजानस्तेनसंयुगे॥ दुद्रुवुः संघशोभूतोद्भ्रांतास्त्रासासमंततः॥३१॥ युष्माभिर्यस्यराज्यंबहुभिरपहृतस
स्यपुत्रोधुनास्तेहतंवः समतिसंप्रसभमुपगतोवैरनिर्यातनेषा॥ इत्युच्चैःश्रावयातायुधनिस्वनारितंवैरिभिर्भो
र्वीयंतत्रोविध्वंसितेजाः सगरनरपतिःस्मारयामासभूयः॥३३॥ तंदृष्ट्वाराजवर्यंसबलरिपुकुलप्रत्तयोयात
तदीक्षाभीताःस्त्रीबालवृद्धंशरणमभिययुःस्वासुसंरक्षणाय॥३४॥ इक्ष्वाकूणांवसिष्ठंकुलगुरुमभितः
सप्तराज्ञांकुलेषुप्रख्याताःसंप्रसूतान्नृपवररिपवः पारदापल्हवाद्याः॥३५॥ वसिष्ठमाश्रमंयांतंवसंतमृषि
भिर्वृतं॥ दृष्ट्वागम्याब्रुवन्सर्वेदूतांजलिपुटान्रुषाः॥३६॥ शरणंभवतोम्लेच्छनानार्तानामभयैषिणां॥ सगरा
ख्याभिनिर्दग्धशरीराणांमुमूर्षतां॥३७॥ सहत्यस्मानशेषेणवैरांतकरणेन्मुखे॥ तस्माद्भयाद्विनिर्भ्रांतावयंजी
वितकांक्षिणः॥३८॥ विभिन्नराज्यभोगार्द्धसदारापत्यबांधवाः॥ केवलंप्राणरक्षार्थंत्वांवयंशरणंगता॥३९॥
नह्यन्योरिपुमान्लोकेसाहसेनबलेनवा॥ यस्तंनिवर्तयितास्मान्पालयेन्मृतोभयात्॥४०॥ वसिष्ठोक्तास्तदा
वयंभूवंराज्ञांकुलगुरुर्यतः॥ तद्वाक्यपूर्वंजैनोदीवत्यभावश्चतादृशः॥४१॥ तेनायंसगरोप्यंधगुरुगौरवयंत्रि
त॥

भवंमद्देशंनान्यंतेवेलामिवमहोदधिः॥४२॥ वंनःकृत्वतामाताकोकानांचगुरुर्व्रते॥ तस्माद्दमान्महाभा
गपरित्रातुंतमर्हसि॥४३॥ जैमिनिरुवाच॥ इतितेषांवचःश्रुत्वावसिष्ठोभगवान्ऋषिः॥ स्वानीकैरकरोत्तासंसगरा
णंसमुपागतान्॥४४॥ दृष्ट्वास्त्रीबालभृत्यंस्वानहतशेषान्नृपान्वयान्॥ दृष्ट्वात्वतप्तोभगवान्सर्वभूतानुकंपक
ः॥चिरंनिरुप्यमनसातान्क्लीक्यचसादरं॥ उज्जीवनयशनैर्वाचामाभैष्टेतिमहामतिः॥४६॥ अथायवोमहाभा
गःकृपयापरयान्वितः॥ समयस्थापयामासराज्ञस्तान्जीवनार्थिनः॥४७॥ वेषान्यंतोपवंनंत्रपकुलविहितशे
षधर्मादयेतंकृत्वातेषांवसिष्ठःसमयमवनिमायात्प्रतिज्ञांनिशम्य॥४८॥ गत्वातंराजवर्यंस्वयमथभगवान्कोशो
तथित्वायथावत्सप्राणानामरीणामपगमनविधावभ्यनुज्ञांययाचे॥४९॥ सकोधोपिमहीपतिर्गुरुवचःसंभा
वयंस्तानरीनधर्मस्यस्वकुलोचितस्यचतथावेषस्यसंत्यागतः॥श्रौतस्मार्तविभिन्नकर्मनिरतानद्विजैश्चदूरोज्झिता
नसासत्केचरुमन्यजनमृतसमानेकृतः पार्थिवान्॥५०॥ अर्धमुंडानशकांश्चकृपल्हवान्श्मश्रुधारिणः॥
यवनान्विगतश्मश्रूनकांबोजाश्चिबुकान्वितान्॥५१॥ एवंविरूपानन्यांश्चचकारस्वकारस्वरूपयान्द्विजान्॥ वेदोक्त
कर्मनिर्मुक्तान्द्विजैश्चपरिवर्जितान्॥५२॥ कृत्वासंख्यासमयेजीवनस्तान्विसर्जयत्॥ ततस्तेरियवस्तस्यत्यक्त
स्वाचारलक्षणं॥५३॥ प्रात्यतांसमनुप्राप्ताः सर्वेवर्णाविनिर्दिताः॥ धिःकृताःसततंसर्वैर्नृसामिरयत्रया॥५४
क्रूराश्चसंघशोलोकेबभूवुर्मलजातयः॥ मुक्तास्तेनाथराज्ञाम्लेकृपवनकिरातादयः सद्यएत्यक्तस्वाचारवेषाग
र्हितेहनगुहाश्चाश्रयाः संबभूवुः॥ एषामंथाविसृष्टिः सततमचमनाज्ञातयोसन्मत्याव्रर्ततेदृष्टचेष्टाजग
तिनरपतेः पालयंतप्रतिज्ञां॥५६॥ ॥ इतिश्रीब्रह्मेमहापुराणेमध्यमभागेसगरोपाख्यानेसगरप्रतिज्ञापा
लनंनामाशीतितमोध्यायः॥८०॥ ॥ जैमिनिरुवाच॥ अथानुज्ञायसगरोवसिष्ठमृषिसत्तमं॥ बलेन
महतायुक्तोबर्बरर्भात्स्ववर्तत॥१॥ ततोविदर्भराडेत्यसस्वसृतांप्रीतिपूर्वकं॥ कोशिन्यास्यामनुयमामनुरूपं
न्यवेदयत॥२॥ सतस्यराज्ञशार्दूलोविधिवद्वह्निसाक्षिकं॥शुभेमुहूर्तेकोशिन्याःपाणिंजग्राहभूमिप॥३॥

स्तिलादिनानिकृतिन्वित्तरहेतस्यातिमत्कृतः॥ विदर्भराजासंमंथ्यातोगंतुंमचक्रमे॥ ४॥ अनुज्ञातस्ततस्तेनपरि
वृढेश्वमत्कृतः॥ निःक्रम्यतत्पुराद्वाश्रूरसेनानुपेयिवान॥ ५॥ संभावितस्ततश्चैवयादवैर्मोत्सोदरैः॥ धनो
घैरर्चितश्चैश्वमथुरायाविनिर्ययौ॥ ६॥ ध्वंससगरोराज्ञाविन्नित्यवसुधामिव॥ कैश्चसन्यान्सर्वोश्चकेसं
कैतगानपि॥ ततोनुमान्यनृपतीन्निजराज्यायसानुगः॥ अनुज्ञातेनपतिः समस्तानयाथिनः॥ ७॥ ततो
बलेनमहतासुधावारसमन्वितः॥ शनैरर्पाडयन्देशान्स्वराज्यमुपजग्मिवान॥ ८॥ संभाव्यमानश्चमुदा
रूपदाभिरनेकशः॥ नानाजनपदैरुत्थैर्मथोध्यांसमुपागमत्॥ ९॥ तदागमनमाज्ञायनागरः सकुलो
जनः॥ नगरंतामलंचक्रेमहोत्सवसमुत्सुकः॥ १०॥ ततःसानगरीसर्वाकृतकौतुकमंगलः॥ सिक्तसंमृष्टभूभागापू
र्णकुंभशताकुला॥ समुच्छ्रितध्वजशतायताकाभिरलंकृता॥ सर्वत्रागरुधूपाघ्राविचित्रकुसुमोज्वला॥ १२॥ सद्दल
तोरणोत्तुंगगोपुराद्यलंकृता॥ प्रसूनलाजवर्षैश्चस्वलंकृतमहीयथा॥ १४॥ महोत्सवसमायुक्ताप्रतिगेहमभूत्पु
री॥ संपूजिताशेषवास्तुदेवानागृहमालिनी॥ १५॥ दिक्चक्रजविनोराज्ञः संदर्शनमुदान्वितैः॥ पौरजानपदैर्हृष्टैः
सर्वतः समलंकृतः॥ १६॥ ततः प्रकृतयः सर्वेतथांतःपुरवासिनः॥ वरकांनाकदेवेशनगरीभिश्चसंवृताः॥ अभ्या
ययुः स्वतः सर्वेसर्वेचपुरवासिनः॥ संतेः समेत्यनृपतिर्लब्धाशीर्वादसत्क्रियः॥ १८॥ वधिरीकृतदिक्चक्रोजयश
ब्देनभूरिणा॥ नानावादित्रसंघोषमिश्रेणमधुरेणच॥ १९॥ सत्कृत्यनान्यथा योगंसहृतस्तैर्मुदान्वितैः॥ आनं
दयन्प्रजाः सर्वाःप्राविशद्वैपुरोत्तमं॥ २०॥ वेदघोषैः समंकुर्वन्ब्रह्मणैराभिनंदितः॥ संस्तूयमानः सुभटैःसू
तमागधबंदिभिः॥ २१॥ जयशब्दैश्चपुरतोनानाजनपदेरितैः॥ कलतालस्वनोन्मिश्रवीणावेणुततःस्वनैः॥
गायद्भिर्गायकजनैर्नृत्यद्भिर्गणिकाजनैः॥ अन्वीयमानोविलसत्श्वेतछत्रविराजितः॥ २३॥ विकीर्यमाणःप
रितः सत्कुजकुसुमाकरैः॥ पुरीमयोध्यामावेशनस्वपुरीमिववासवः॥ २४॥ दृष्ट्वापुतेनगंधेनब्राह्मणानांच
वर्मना॥ जगामसमधेनगरंगरुद्श्रीमदलंकृतं॥ २५॥ अवरुह्यततोयानात्भार्याभ्यांसहितोमुदा॥ प्रविवे

गुरुद्दंमातुरुश्चपुरुजनायुतं॥ २६॥ पूर्यैकलामुपारामस्यमातरंविनयान्वितं॥ तत्पादौसंस्पृशन्मूर्ध्नाप्रणाममक
रोत्तदा॥ २७॥ साभिनंद्यतनमाशीर्भिर्हर्षगद्गदयागिरा॥ ससंभ्रमंसमुत्थायपर्यस्वजननचात्मजं॥ २८॥ सहर्षबद्ध
भाशीर्भिरभ्यनंदद्दुभेसुखं॥ सतंसंभाव्यकथयातत्रस्थित्वाचिराद्दिवं॥ २९॥ अनुज्ञातस्तयाराज्ञानिश्चक्रामत
द्गृहात्॥ ततःसानुचरोराज्ञाश्वेतव्यजनवीजितः॥ स्फुरद्राजश्रीवश्रीमानसुभासमगमछनैः॥ सप्रविश्यसभांदि
व्यामनेकनृपसेवितां॥ ३३॥ नत्वागुरुजनंसर्वमाशीर्भिश्चाभिनंदितः॥ सिंहासनेशुभेदिव्येभद्रासनेनरेश्वरः
३२॥ संसेव्यमानश्चनृपैर्नानाजनपदेश्वरैः॥ नानाविधाःकथाःकुर्वन्सतत्रनृपसत्तमः॥ ३३॥ संपीयमाणः
कृतरागुवासमहर्बंधुभिः॥ प्रतिष्ठांपालयित्वेवंत्रिदिवेउक्तोनृपः॥ अन्वतिष्ठद्यथान्यायमर्थत्रयमुदारधी
ः॥ स्वप्रभावनिषेवेशेषैरिक्ष्वाकुवोधिपः॥ ३५॥ एकाकीत्रांशथिवीमन्वशाद्दासवोयथा॥ स्वयातिस्थापितःपूर्वं
परिभावममार्जितः॥ ३६॥ सयांप्रतिष्ठांमारुद्दासम्यकूपरिपूर्यच॥ समर्द्धोपाधिनगरग्रामायतनमालिनां॥ ३७
जित्वाद्यत्नशेषेणपालयामासमेदिनीं॥ एवंगछतिकालेचवसिष्ठोभगवानृषिः॥ ३८॥ अभ्याजगामनंभू
योद्रष्टुकामोनरेश्वरं॥ तमायांतमितिप्रेक्ष्यमुनिवर्यंससंभ्रमः॥ ३९॥ प्रत्युज्जगामार्घहस्तः सहितैस्तैर्नृपैर्नृ
पः॥ अर्घ्यपाद्यादिभिः सम्यक्पूजयित्वामहामतिः॥ ४०॥ प्रणाममकरोत्तस्मैगुरुभक्तिसमन्वितः॥ आशीर्भिर्वं
द्धयित्वातंवसिष्ठः सगरंतदा॥ ४१॥ आस्यतामितिहोवाचसहसर्वैर्नरेश्वरैः॥ उपाविशत्ततोराजाकांचनेप
रमासने॥ ४२॥ मुनिनासमनुज्ञातः सभार्यासहराज्ञभिः॥ आपवस्तुनृपश्रेष्ठमुपासीनमपत्करे॥ ४३॥ उवाच
श्रृण्वतांराज्ञांश्रुत्वेमंहृक्षरंवचः॥ वसिष्ठउ॥ कुशलंननुतेराजन्बांधवेष्वंतरेषुच॥ ४४॥ मंत्रिषुमात्यव
र्गेषुराज्येवासकुलेऽनघ॥ दिष्ट्याचावर्तितास्तेसर्वेसमग्रबलवाहनाः॥ ४५॥ अयत्नेनैवयुद्धेषुभवतारिपवोहताः॥
दिष्ट्यारूढप्रतिष्ठेनममसानयतावचः॥ ४६॥ अरयस्तुयत्नधर्मेणरुद्धयाधिनविसर्जिताः॥ तान्चित्तित्यनरान्ते
तुंपुनर्दिग्विजयेछया॥ ४७॥ गतस्यवाहनबलस्तमित्यश्रुणुवंचः॥ ज्ञातश्चिदिक्ष्वाकुंभूयःश्रुत्वातांनगराहितां॥

